॥ ओ३म् ॥

संसारविषवृक्षस्य द्वे फले अमृतोपमे।
सुभाषितं च सुस्वादु सङ्गतिः सुजने जने॥

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

बहुजन्मसु चाभ्यस्तं दानमध्ययनं तपः।
तेनैवाभ्यासंगोगेन देही चाभ्यते पुनः॥

( चाणक्य-नीति )

卐 वर्षम्-७ 卐 अंकः-१९ ( १६१ ) 卐 १ अप्रैलमासः २०१८ तः १५ अप्रैलमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८


## राष्ट्रपति उक्तवान, वसुधैव कुटुम्बकस्य भावनां संस्कृतभाषा एव संरक्षकवती अद्यापि

भुवनेश्वर। राष्ट्रिसंस्कृतसंस्थानस्य शतवार्षिकी समारोहे भागं गृहित्वा राष्ट्रपति रामनाथकोविन्दः उक्तवान यत् वसुधैवकुटुम्बकस्य भावनां संस्कृतभाषा एव अद्यापि संरक्षितवान। संस्कृत सदृश प्राचीन भारतीय भाषासु सदैव प्रासंगिकता एवं प्रासंगिक ज्ञानं-विज्ञानं एवं दर्शन संरक्षणाय एवं तं परिवर्तित युगेन सह अग्रसारनस्य क्षमतास्ति। एते सर्वेषां कृते लाभकारी आस्ति। एशिया, युरोप एवं



अमेरिकायाः अनेकेषु विश्वविद्यालयेषु संस्कृत विभागेषु अध्ययनं एवं अनुसंधानं प्रचलति। भारत एवं विदेशस्य संस्थानेषु विज्ञान एवं संस्कृतेः सम्पदां संस्कृतभाषायाः माध्यमेन वर्धयितुं कार्य प्रचसति। अस्मिन्नवसरे राष्ट्रपति राष्ट्रियसंस्कृतसंस्थानस्य प्रयारस्य प्रशंशा अकरोत्। अस्मिन संस्थाने संगणक प्रयोगस्यापि प्रशंशा कृतवान। इतः पूर्व कोविन्दः रविवासरे प्रातः काले पत्नी सविताकाविंन्देन सह पुरी स्थित मंदिरे जगन्नाथस्य दर्शनं कृतवान एवं पूजा अर्चना कृत्वा आर्शिवादः प्रप्तवान अस्मिन्नवसरे तेन सह केन्द्रियमंत्री धर्मेन्द्रप्रधान, गजपतिमहाराज दिव्यदेवसिंह, मंदिरस्य मुख्य प्रशासक पीके जेना आदि उपस्थिताः आसन्।

## द्विनवतिः विदुषः एवं विदुषीः संन्यासिजनान् राष्ट्राय समर्पितवान बाबारामदेवः

हरिद्वार। योगगुरु बाबारामदेवस्य 24वीं सन्यासिदिवस एवं रामनवमी पर्वस्य समुपलक्षो पतञ्जलि योगपीठः एकः इतोऽपि नूतन इतिहासस्य रचना कृतवान। हरकीपौड़ी मध्ये आयोजित भव्यकार्यक्रमे अष्टाध्यायि, व्याकरण, वेद, वेदांग, उपनिषदे दीक्षित द्विनवतिः विद्वान व विदूषी सन्यासिजनान् राष्ट्र समर्पितवान।



तेषु 51 विद्वान एवं 41 विदूषी अस्ति। अस्मिन्नवसरे बाबारामदेवः उक्तवान् यत् भगवान रामस्य संन्यास, मर्यादा, वेद, गुरू व शास्त्राणां मर्यादासु निवसित्वा अयं संन्यासी एक बहुवृहद् संकल्पाय प्रतिबद्धोऽस्ति

ते उक्तवन्तः यत् एतेषां सन्यासिनां रूपे वयं स्व ऋषिणां उत्तराधिकारीन् भारतीय संस्कृति एवं परम्परायाः प्रचार-प्रसाराय समर्पित कुर्मः। बाबारामदेवः उक्तवान यत् अस्माकं लक्ष्यं 2050 पर्यन्तं 1000 सन्यासिजनान् दीक्षा प्रदानमस्ति। एते संन्यासि अस्माकं पूर्वज ऋषि-मुनीनां पताका सम्पूर्ण विश्वे प्रसारयिष्यन्ति।

इतः पूर्व देव ऋषि, सूर्य, अग्नि इत्यादिः साक्षि रुपे स्वीकृत्य **शेषभागःद्वितीयपुटे**

## दिल्लीलाइब्रेरीबोर्डमाध्यमेन पत्रिका सम्पादक सम्मान समारोहस्य आयोजनम्

दिल्ली। दिल्लीलाइब्रेरीबोर्डमाध्यमेन मार्चमासस्य 28 दिनांके पत्रिका सम्पादक सम्मान समारोहस्यायोजनमभवत्। येषु सन् 2017 वर्षाय संस्कृत, उर्दु एवं पंजाबी भाषायाः पत्रिकानां सम्पादकान् सम्मानितांअकरोत्। कार्यक्रमे मुख्यातिथि रूपे संस्कृति



मंत्री भारतसर्वकारः डॉ. महेशशर्मा, विशिष्टातिथि रूपे राजनारायणशुक्लः कार्यकारी अध्यक्ष उत्तरप्रदेश भाषासंस्थानस्य, तत्रैव कार्यक्रमस्य अध्यक्षता प्रो. बलवंत जानी, कुलाधिपति सागरविश्वविद्यालय सागर मध्यप्रदेश अस्मिन्नवसरे समागतानां अतिथिनां संम्मानं दिल्लीलाइब्रेरी वोर्डस्य अध्यक्ष डॉ. रामशरणगौड व दिल्ली पब्लिक लाइब्रेरी महानिदेशक डॉ. लोकेशशर्मा कृतवान। मुख्यातिथि महेशशर्मा उक्तवान यत् मानवमूल्यानां प्रवाह कर्तु पुस्तकालयानां महत्वपूर्ण योगदानमस्ति। दिल्ली पब्लिक लाइब्रेरी माध्यमेन कृतप्रयासः भारतीय संस्कृतिं वर्धयति। दिल्ली पब्लिक पुस्तकालयस्य सदस्यस्य रूपे मम भावनात्मक सम्बन्धोऽस्ति। अस्मिन्नवसरे डॉ. रामशरणगोड उक्तवान यत् दिल्ली लाइब्रेरी



आयोगे विगत त्रिषु वर्षेषु दिल्ली पब्लिक लाइब्रेरी अनेक महत्वपूर्ण कार्यं कृतवान। अस्मिन दिशायां दिल्ली एवं एन.सी. आर. सूचनाकेन्द्रस्य स्थापना आदि अभवत्। पुस्तक संस्कृति वर्धयितुं गृहे-गृहे-पुस्तकाम्, गृहे-गृहे दस्तकः अस्याः योजनायाः आरम्भोऽपि अभवत्।

अस्मिन्नवसरे सन् 2017 वर्षाय संस्कृत भाषायाः श्रेण्यां प्रथम पुरस्कार डॉ. रमाकान्तशुक्ल सम्पादक 'अर्वाचीनसंस्कृतम्', द्वितीय पुरस्कार श्रीमती मंजुशर्मा सम्पादिका, 'संस्कृतसंवादः'। उर्दूभाषायाः श्रेण्यां प्रथम पुरस्कारः जनाब इफ्तिखारइमाम सिद्दीकी सम्पादक मासिक पत्रिका 'शायर', द्वितीय पुरस्कार जनाब आदिलरजामंसुरी सम्पादक 'इस्तिपसार'। पंजाबी भाषायां प्रथम



पुरस्कार श्रीसुशील दोसांझ सम्पादक 'हूण', द्वितीय पुरस्कार डॉ. गुरुइकबालसिंह सम्पादक 'त्रिशकुं' दत्तवान। विगतमासे अत्रैव हिन्दी भाषायाः सर्वश्रेष्ठ पत्रिकाः सम्मानितमपि कृतवान्।

उक्त पुरस्कारेषु डॉ. महेशशर्मा संस्कृतिमंत्री भारतसर्वकारः प्रथमं पुरस्काराय 1 लक्ष्य, द्वितीय 75 सहस्त्र प्रसस्तिपत्र इत्यादि दत्तवन्तः। कार्यक्रमस्यान्ते महानिदेशक दिल्ली पब्लिक लाइब्रेरी सर्व धन्यवादः ज्ञापितवान।

# संस्कृताध्ययनात् विना भारतीय संस्कृतेः पूर्ण ज्ञानम् असम्भंवमस्ति–सेवारामशर्मा

नवदेहली। विश्वस्य समस्त प्राचीन भाषासु संस्कृतस्य सर्वोच्च स्थानमपि। विश्वसाहित्यस्य प्राचीनतम ग्रन्थ ऋग्वेद अस्यां



संस्कृतभाषामेवास्ति। संस्कृतस्य अध्ययनात् विना भारतीय संस्कृतेः पूर्ण ज्ञानं कदापि सम्भवो नास्ति। विश्वस्य सर्वे विद्वान्सः संस्कृत भाषाया अतिसमृद्ध एवं विपुल भण्डारेन् आश्चर्यचकितोऽस्ति।

विचारोऽयं दिल्लीसंस्कृतअकादमी माध्ययेन अकादमी सभागारे आयोजित पुस्तक-वितरण-समारोह 2017-2018 इत्यस्य मुख्यातिथि दिल्ली सर्वकारस्य पूर्वगृहसचिव श्रीसेवारामशर्मा व्यक्तवान।

अस्मिन्नवसरे कार्यक्रमस्य अध्यक्षता समये दिल्लीसंस्कृतअकादम्याः उपाध्यक्षा डॉ. कान्ताभाटिया यत् यदि कस्यापि राष्ट्रस्य संस्कृति एवं तस्य राष्ट्रस्य परिचायको भवति। विज्ञानाय संस्कृतस्य शोधोवरि कार्यं कर्तव्यम्, येन संस्कृतस्य यथार्थ स्वरूपं जनानां समक्षे आनयितुं शक्यते।

अस्मिन्नवसरे कार्यक्रमस्य विशिष्टतिथि उपशिक्षानिदेशक डॉ.वीरेन्द्रशास्त्री उक्तवान यत् विश्वस्य समस्त प्राचीन भाषा एवं ताषांसाहित्ये संस्कृतस्य विशिष्ट स्थानमस्ति। विश्वस्य अनेकेषु देशेषु संस्कृतभाषायाः वैज्ञानिकं स्वरूपं अवगमनाय अध्ययनम् एवं गम्भीर शोधकार्य प्रचलति।

अस्मिन्नवसरे विशिष्टतिथि रूपे नवभारतटाइम्स सहायक सम्पादक डॉ. अश्वनिशास्त्री उक्तवान यत् भारतस्य प्राचीन सांस्कृतिक, ऐतिहासिक, धार्मिक, आध्यात्मिक, दर्शनिक, सामाजिक एवं राजनैतिक जीवनविकास्य समृद्धेः सम्पूर्ण व्याख्या संस्कृतसाहित्ये वर्णिताऽस्ति।



## प्रथमपुटस्य शेषभागः

## द्विनवतिः विद्वान एवं विदुषी...

सर्वेषां संन्यासिनां मुख्य विरजाहोम एवं मुण्डन संस्कार (कृतवान। नवनिर्मित ऋषिग्रामे संचालित चतुर्वेद महापारायण यज्ञस्य पुणाहुत्यानन्तरं सर्वे संन्यासि शोभायात्रया सह वीआईपी तटाय प्रस्थानं कृतवान। गंगा स्वच्छता अभियान एवं नमामि



गंगे परियोजनां अवधारे स्थापयित्वा सर्वेषां मुंडनं पतंजलि स्थित ग्रामे कृतवान। सांकेतिक रूपे सर्वे संन्यासिजनाः शिखासूत्र व यज्ञोपवीत पतितपावणि गंगायाः जले विसर्जितवान। सर्वे गंगायां स्नानन्तरं श्वेतवस्त्रं त्याज्य भगवा वस्त्रं धृतवन्तः।



तदनन्तरं बाबा रामदेव एवं संतजनानां पक्षतः 92 संन्यासि दीक्षुजनान् शिरे पुरूषुक्त मंत्रेण 108 बारं गंगा जलेन अभिषेकं कृत्वा पवित्र सन्यास संकल्पः दत्तवान।

अस्मिन्नवसरे बाबारामदेव उक्तवान यत् संन्यास धारणं जीवनस्य सर्वश्रेष्ठ गौरवमस्ति। इत्यारभ्य सर्वे 92 संन्यासि ऋषि परम्परायाः निर्वहने कृत्वा मातृभूमि, ऋषिसत्ता एवं अध्यात्मसत्तायां जीवनं व्यतितं करिष्यन्ति। बाबारामदेवः उक्तवान यत् एतादृशं माता-पिता धन्योऽस्ति यो स्व पूत्रे मातृभूम्ये समर्पितं कुर्वन्ति। आचार्य बालकृष्णः संन्यास धर्मस्य मर्यादायाः उल्लेखं कृत्वा उक्तवान यत् संन्यासि संकल्पं सदा स्मृतौ धृत्वा सर्वे अविवेकपूर्ण कामना एवं विषयभोगेन् मुक्त भुत्वा सन्यास धारणं विश्वस्य महान उत्तरादियित्वमेवं गौरवमस्ति। ते उक्तवन्तः यत् गुरू, रूपं तु कोऽपि भवितुं शक्यते परञ्च शिष्य रूपे गुरूध र्म एवं राष्ट्रधर्मस्य पालनं कठिन कार्यमस्ति। एकः संन्यासिजनाय गुरूनिष्ठा, कर्तव्यनिष्ठा व ध्येयनिष्ठायां निरन्तरता एव जीवनस्य प्रयोजनं भवितव्यम्।

माता मन्दिरस्य संस्थापकः स्वामि सत्यामित्रानन्द उक्तवान यत् गौतमबुद्ध शंकराचार्य एवं समर्थगुरू रामदासस्य पश्चात एतावत समुहिक सन्यासि दीक्षा कोऽपि न दत्तवान। अनया योगगुरूरामदेव साधुवादोऽस्ता ते उक्तवन्तः यत् एतावत संन्यासिजनम् देशसेवायां समर्पित करणं रामराज्यस्य स्थापना, ऋषि परम्परा एवं भावि आध्यात्मिक भारतस्य स्वप्नं साकार करणं सदृशमस्ति।

कार्यक्रमे वात्सल्यग्रामस्य संस्थापक ऋतम्भरा उक्तवान यत् ध न्योऽस्ति इयं देवभूमि, गांगायाः तटः, ते परिवारजनाः एवं जलं यो भारतस्य अस्याः उज्ज्वल परम्परायाः साक्षी अभूत्। एकः वास्तविक संन्यासि वैदिक परम्परां समर्पित भुत्वा मा भारत्याः गर्भ धन्यः करोति। योगयुक्त भुत्वा धन्य एवं कृतार्य अपि भारतस्य परम्परा अस्ति। उक्तवान यत् भगवा वस्त्र अग्नि सदृशमस्ति। अस्मिन अग्ने तपित्वा संन्यासिजनानां मन कुन्दनं भवन्ति।

सुत्तुरमठ मैसुरकर्नाटकस्य जगद्गुरू शिवरात्रि देसीकेन्द्रयहास्वामि उक्तवान यत् भारते जन्यः, तेषु आदि हिमालयस्य ताषां उपत्यकायां प्रवासः तेषु प्रवाषेष्वपि हरिद्वारे बाबारामदेवस्य सानिध्यः तेषु सान्धियेष्वपि बाबा द्वारा दीक्षाग्रहणं गौरवस्य विषयोऽस्ति। अस्मिन्नवसरे साधनाकेन्द्रआग्रम देहरादुनस्य स्वामि प्रेमविवेकानन्द उक्तवान यत् स्वामिविवेकानन्दस्यानुसारं भारतस्य आत्माया मूलतत्वं आध्यात्मिकंतास्ति। गणितं, विज्ञानं, राजनीति व कला इत्यादि नास्ति।

# वेव्ज माध्यमेन योगस्य उद्भव विकासे संगोष्ठी

नवदेहली। वेव्ज (Wider Association for vedic Studies) एवं मानव अभ्युदय संस्था माध्यमेन संयुक्त तत्वाधाने नवदेहल्यां "योगस्य उद्भव विकासे" एकाः संगोष्ठ्या आयोजनमभवत्। मुख्य वक्ता रुपे वेलियमस्य भारतविद्याविद् डॉ. कोइनराड-एलस्टः यौगिक क्रियाः हरप्पा सभ्यतया सम्बद्ध कृत्वा पशुपति शीलस्य माध्यमेन प्रदर्शनस्य प्रयास अकरोत। ते ब्राह्मनग्रन्थानांम् एवं उपनिषदानां उदाहरणं दत्वा योगस्य महत्वं विषये उक्तवन्तः। तेषामनुसारं वेदमन्त्रेषु योग समन्वय अर्थस्य द्योतकोऽस्ति। योगस्य प्राचीन परिभाषा कठोपनिषदे अस्ति। "योग" शब्दः वेदेषु तथा नास्ति यथा जनाः जानन्ति। मुख्य वक्तव्ये टिप्पणि कृत्वा प्रो. लल्लनप्रसादः योगस्य आध्यात्मिक पक्षं व्यक्तवान। श्रीसुभाष गांगते पारमार्थिक योग एवं अष्टांग योगं स्पष्टी कृतवान। डॉ. गणेशदत्तशर्मा जीवनस्य प्रत्येक क्रियां योग उक्तवान। श्री वाई.के.वाधवा मनुस्मृत्याः षष्ठाध्याये वर्णित प्राणायामस्य महत्वं विषये उक्तवान्। डॉ. शशितिवारी भगवान श्रीकृष्णं परमयोगी उक्त्वा श्रीमद्भगवद्गीतां योगस्य विवेचनात्मक ग्रन्थ उक्तवान। अस्मिन्नवसरे डॉ. धर्माशर्मा, डॉ. चाँदभारद्वाराज, डॉ.सरोजचावला, डॉ. विजयशंकरद्विवेदी, डॉ. करुणाआर्य, डॉ.अपर्णाधीर, डॉ. गीतारानी, योगेशपांडे, मुल्यागीभारतीय, श्रीमती भावनात्यागी, एवं अन्य गणमान्यजनाः उपस्थिताः आसन्। डॉ. रंजीतवेहरा वक्ता एवं श्रोतृणां धन्यवादः ज्ञापितवान्।





# जवाहरलालनेहरूविश्वविद्यालये सम्पन्ना 'संस्कृतवाङ्मये श्रीरामः' इत्यस्मिन् विषये द्विदिवसीया राष्ट्रिया संगोष्ठी

**सोनल बैरवा**
**पी.एच्. डी. शोधछात्रा, संस्कृत एवं प्राच्यविद्यासंस्थानम्**

नवदेहली। जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत एवं प्राच्यविद्यासंस्थानस्य तथा उत्तरप्रदेशसर्वकारान्तर्गत-



संस्कृतिविभागीय-अयोध्या-अनुसंधान-संस्थानस्य च संयुक्ततत्त्वावधाने 2018 वर्ष-मार्च-मासस्य 26-27 दिनाङ्कयोः 'संस्कृतवाङ्मये श्रीरामः' इति विषयमधिकृत्य दिवसद्वयं राष्ट्रियसम्मेलनं समायोजितम् । अस्य सम्मेलनस्य निदेशकः संस्कृत एवं प्राच्यविद्यासंस्थानस्य आचार्यः प्रो. सी. उपेन्द्र राव महोदयः।

उद्घाटन-समारोहः

सम्मेलनस्य उद्घाटनसत्रे स्वागतोद्बोधने प्रो. राव महोदयः उक्तवान् यत्- 'वयं रामेण विना संस्कृताध्ययनस्य कल्पनामपि कर्तुं न शक्नुमः। रामो विग्रहवान् धर्मः, अर्थात् रामः धर्मस्य मूर्तिमत्स्वरूपमस्ति। सः भारतस्य गौरवभूतः तथा च प्रेरणास्रोतश्च वरीवर्ति। यदा लोके अन्यान्यविषयानाम् आचार्याः भगवतः श्रीरामस्य विषये विविधानुसन्धानरताः सन्ति, तदा तु संस्कृतविद्वांसः, ये रामस्य वास्तविकसंरक्षकाः रमाधारितस्य समग्रस्य साहित्यस्य चर्चां कुर्युः यतोहि संस्कृतसाहित्यस्य प्रथमं महाकाव्यं (रामायणम्) रामस्य कथोपरि एव विरचितम् ।' इति ।

डॉ. योगेन्द्रप्रतापसिंहः (निदेशकः, अयोध्यानुसंधानसंस्थानस्य, श्री विजयनाथपाण्डे (महामन्त्री, महामना-मालवीयमिशन्, बनारस-हिन्दूविश्वविद्यालयः, वाराणसी, पद्मश्री प्रो. रमाकान्तशुक्लः (अध्यक्षः, देववाणीपरिषद्), श्री दर्मयासः (बाली, इण्डोनेशिया) च उद्घाटनसत्रस्यातिथयः आसन्, अपि च श्री माडभूषि-श्रीधरः (केन्द्रीयसूचनायुक्तः, भारतसर्वकारस्य), प्रो. परमेश्वरनारायणशास्त्री (कुलपतिः, देहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य), प्रो. पीयूषकान्तदीक्षितः (कुलपतिः, उत्तराखण्डसंस्कृतविश्वविद्यालयस्य), पद्मश्री प्रो. रमाकान्तशुक्लः (देववाणीपरिषदः अध्यक्षः), श्री दर्मयासः (बाली, इण्डोनेशिया) च समापनसत्रस्यातिथयः आसन्।

डॉ. योगेन्द्रप्रतापसिंहः सम्मेलनस्य उद्घाटनसत्रे श्रीरामस्य विविधविषयेषु ध्यानमाकर्षितवान् यथा- रामायणस्य शिल्पकला-चित्रकलयोः मध्ये सम्बन्धः, विश्वस्यविविधक्षेत्रेषूपलब्ध-रामकथाः च। एवमेव समापनसत्रे श्री माडभूषि-श्रीधरः 'राम-रामायणयोः सार्वभौमिकमूल्यानि' इत्यस्मिन् विषये व्याख्यानं सुन्दरं दत्तवान्। श्री विजयनाथ पान्डे महोदयः रामलीला तथा रामकथायाः च महत्त्वं प्रतिपादितवान्। पद्मश्री प्रो. रमाकान्तशुक्लः जैनरामकथायाः विषये आकर्षकम् उद्बोधनं दत्तवान्। श्री धर्मयासेन इण्डोनेशियादेशे प्रचलितरामायणस्य विषये विस्तृतविवरणं प्रदत्तम्।

भारतात् तथा च विदेशेभ्यः समागतैः प्रतिभागिभिः विविधसत्रेषु त्रिंशत् पत्राणि प्रस्तुतानि। श्री दर्मयासः इण्डोनेशियतः, श्रीमती रियाम अलशादायदेह सीरियतः, ब्रेण्डा एच एक्स ली वियतनामतः, जि झाओ चीनदेशतः, प्रमह निरन् थाईलैण्डदेशतः च विदेशीविद्वांसः आसन्, ये स्वदेशे प्रचलितरामायणस्य विषये विस्तृतानि पत्राणि पठितवन्तः संगणकयन्त्रमाध्यमेन च विविधानि चित्रानि प्रादर्शयन्।

प्रो. शशि तिवारी, डॉ. डॉली जैन, जिग्नेश रावलः, डॉ. के. वेंकटेश्वरुलु, डॉ. मीनाक्षी पाण्डे, अक्षरपरसाना, पवित्रा अग्रवालः, श्रीमती जोन्नलगड्डु वसुसेना, प्रो. सत्यनारायण चक्रबर्ती, प्रो. जे. एस्. आर्. प्रसादः, कुशदेपाला, डॉ. विकास सिंहः, राणपुरवलवन्दनः, डॉ. ए. वी. नागसम्पिगे, आरुषि बहुगुणा, तिलक पारेखः, रामकरणलुहारः, प्रो. परमेश्वरनारायणशास्त्री, डॉ. नृसिंहनाथगुरुः, डॉ. मिराज अहमदः अन्ये च भारतदेशस्य पत्रप्रस्तुतकर्तारः आसन्।

सम्मेलनमिदं राम-रामायणयोः विविधविषयेषु केन्द्रितमासीत्। प्रतिभागिनः विविधग्रन्थानां चयनं कृतवन्तः यथा रामायणं, चम्पूरामायणम्, उत्तररामचरितम्, जैनरामायणं (पउमचरिय), भासकृत-अभिषेकनाटकं, प्रतिमानाटकं च, महाभारतं, योगवाशिष्ठं- आनन्दरामायणं, रघुवंशमहाकाव्यं, मुरारिकृत-अनर्घराघवं, भवभूतिकृत-महावीरचरितं-गोपालरायकृत श्रीरामचन्द्रोदयम् इत्यादि ।

कार्यक्रमस्यास्य साफल्ये संकायस्य आचार्याः, डा. अमिताभ उपाद्यायः, श्री अमित सिंहः, श्री अजय कुमारः, कुमारी सोनल बैरवा कुमारी पवित्रा, श्री आनन्द कुमारः, तथा च संकायस्य शिवानन्दादयः विविधछात्राः इत्येतेषां सर्वेषां महत् योगदनमासीत् ।

## राष्ट्रियसंस्कृतसंस्थानम्

**मानितविश्वविद्यालयः**

**(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः)**

**56-57, इन्स्टीट्यूशनल एरिया जनकपुरी, नवदेहली - 110058**

**(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितः)**

**दूरभाषाः - 011-28520979, 28520966, 28524993, 28524995**

### संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गते 2018-19 वर्षस्य वित्तीयसहायतार्थम् अधिसूचना

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य तत्त्वावधाने नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन 2007 तमवर्षीयायाः संस्कृतशिक्षायाः विकासस्य पुनरीक्षितयोजनायाः अन्तर्गततया अधोनिर्दिष्टाभ्यः योजनाभ्यः 2018-2019 तमवर्षस्य वित्तीयसहायतानुदानं निमित्तीकृत्य निर्धारितप्रपत्रानुगुणम् आवेदनपत्राणि आमन्त्र्यन्ते-

1.संस्कृतशिक्षणाय वित्तीयसहायता-

(क) पारम्परिकसंस्कृतपाठशालासु/महाविद्यालयेषु संस्कृताध्यापकेभ्यः वित्तीयसहायतानुदानम्।

(ख) पारम्परिकसंस्कृतपाठशालासु/महाविद्यालयेषु आधुनिकविषयाध्यापकेभ्यः वित्तीयसहायतानुदानम्।

(ग) राज्यसर्वकारसम्बद्धेषु माध्यमिकविद्यालयेषु/उच्चतरमाध्यमिकविद्यालयेषु संस्कृताध्यापकेभ्यः वित्तीयसहायतानुदानम्।

2. देशे अभावग्रस्तपरिस्थितिषु उषितेभ्यः संस्कृतपण्डितेभ्यः सम्मानराश्यनुदानम्।

3. सर्वकारेतरसङ्घटनेभ्यः/मानितसंस्कृतविश्वविद्यालयेभ्यः/ विभिन्नशोधपरियोजनाभिः कार्यक्रमैः सह युक्तेभ्यः विश्वविद्यालयेभ्यः संस्कृतसंवर्धनगतिविधीनां कृते वित्तीयसहायतानुदानम्।

4. संस्कृतस्य दुर्लभपुस्तकानां पुनर्मुद्रणाय, प्रकाशनाय तथा संस्कृतपुस्तकानां नैकप्रतिकृतिक्रयणाय च वित्तीयसहायतानुदानम्।

5. सेवानिवृत्तानां/ख्यात्यर्जितसंस्कृतविदुषां (शास्त्रचूडामणीनां) सेवानाम् उपयोगार्थं वित्तीयसहायतानुदानम्।

6. पारम्परिकसंस्कृतपाठशालासु/संस्थासु विद्यमानानां छात्राणां व्यावसायिकप्रशिक्षणकार्यक्रमाणाम् आयोजनार्थं पञ्जीकृतशैक्षिकसङ्घटनादिभ्यः वित्तीयसहायतानुदानम्।

7. संस्कृतशिक्षणस्य मानकानां परिपोषणाय विश्वविद्यालयेभ्यः/ मानितविश्वविद्यालयेभ्यः/सी.बी.एस.ई./ एन्.सी.ई.आर्.टी./ एस्.सी.ई.आर्.टी प्रभृतिभ्यः वित्तीयसहायतानुदानम्।

❖ **उपर्युक्तानां योजनानाम् अन्तर्गततया वित्तीयसहायतार्थम् आवेदयितुम् अन्तिमदिनाङ्कः 30.06.2018 ।**

---

8. संस्कृतस्य विकासाय दशवर्षीयभावियोजनायाः परिकल्पना तथा क्रियाविधिपत्रकान्तर्गततया (Vision & Road Map) अष्टादशी-परियोजनानां निमित्तम् आवेदनपत्राणि आमन्त्र्यन्ते।

❖ **अष्टादशीपरियोजनानां निमित्तम् आवेदनपत्रस्य स्वीकृतेः अन्तिमदिनाङ्कः 30.04.2018 ।**

---

**सूचना**-प्रत्येकं योजनायाः कृते आवेदितानि असम्पूर्णानि आवेदनपत्राणि तथा निर्धारिततिथेः पश्चात् प्राप्तानि आवेदनपत्राणि नैव स्वीक्रियन्ते। उपर्युक्तानां सर्वासां योजनानां (क्रमशः 1 तः 8) आवेदनपत्राणि, नियमाः, सूचनाः इत्यादीनां सम्पूर्णं विवरणं संस्थानस्य वेब सङ्केतात् www.sanskrit.nic.in प्राप्तुं शक्नुवन्ति।

**कुलसचिवः (प्र)**



# सम्पादकीयम्

## कर्मफलस्य अनिवार्यता, प्रायश्चितस्य च प्रक्रिया

कमर्णः फलमनिवार्यं विद्यते । समस्तजगतः व्यवस्था कर्मफलाधारेणैव तिष्ठति । यादृशं कुरुते कर्म तादृशं फलमश्नुते इति श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन कथितम् । ईश्वरः सम्यक् न्यायकर्तारूपेण वर्तते । न्यायस्य इदमेव तात्पर्यं वर्तते यत् दुष्टानां कृते सम्यक् दण्डविधानं स्यात् कश्चित् । पूजानाचर्नवन्दनकर्तृणां च कृते तेषां दुष्कर्माणां फलस्वरूपं दण्डविधानं न्यूनता अल्पता वा स्यादिति कथं न्यायं संगतम् । तादृशानां कुटिलानां कृते दण्डविधाने पक्षपातं न स्यादिति । भ्रातृणां कृते मित्राणां वा कृते अधिकारिणामेतदेव पक्षपातो दृश्यते । ईश्वरेणापि चेत् एवमेव क्रियते तदा न्यायस्य अस्तित्वमेव किं भविष्यति ।

पापकर्मणां परिहारस्योपायं कृत्वा तस्य दण्डविधनात् आत्मानं परिरक्षणार्थमुपायं कुर्वन्ति तेषां कृते सम्यकं मार्गः प्रायश्चितमेव वर्तते । स्वेच्छापूर्वकं तस्य दण्डग्रहणं कृत्वा अस्मिन् एव जीवने पापकर्मणां प्रायश्चितं करणीयम् । अनेन च प्रायश्चितकर्मणा आत्मनः शुद्धिर्भवति । मनसः सन्तापं विनश्यति । चित्तस्य निर्मलता जायते । अन्तःकरणं शान्तं भवति । समाजे अपि पुनः प्रतिष्ठा प्राप्यते । विगतं च विश्वासः सम्मानं च पुनरायाति । न्यायालये यदि कश्चिद् स्वयमेव पापानां कृते स्वेच्छया स्वीकरणं करोति तदेव तस्य प्रायश्चितस्य मार्गं प्रशस्तं भवति । एषा एव प्रायश्चितस्य प्रक्रिया ।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

अगले मन्त्र में इन्द्र शब्द से ईश्वर और सूर्यलोक का प्रकाश द्य किया है-

**युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा।**
**अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर॥३॥**

**अर्थ**-इस मन्त्र में लुप्तोपमालङ्कार है। सब मनुष्यों को सब विद्या पढ़ने के पीछे उत्तम क्रियाओं की कुशलता में प्रवृत्त होना चाहिए। जैसे सूर्य का उत्तम प्रकाश संसार में वर्तमान है, वैसे ही ईश्वर के गुण और विद्या के प्रकाश का सब में उपयोग करना चाहिए ॥३॥

मनुष्यों को परमेश्वर से क्या-क्या माँगना चाहिए, सो अगले मन्त्र में प्रकाश किया है।

**एहि स्तोमँ अभि स्वराभि गृणीह्या रुव।**
**ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय॥४॥**

अर्थ-इस मन्त्र में लुप्तोपमालङ्कार है। जो पुरुष वेदविद्या वा सत्य के संयोग से परमेश्वर की स्तुति, प्रार्थना और उपासना करते हैं, उनके हृदय में ईश्वर अन्तर्यामिरूप से वेद-मन्त्रों के अर्थों को यथावत् प्रकाश करके निरन्तर उनके लिए सुख का प्रकाश करता है, इससे उन पुरुषों में विद्या और पुरुषार्थ कभी नष्ट नहीं होते ॥४॥

फिर भी ईश्वर किस प्रकार का है, इस विषय का अगले मन्त्र में प्रकाश किया है-

**उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे। शुक्रो यथा सुतेषु णो रारणत् सख्येषु च ॥५॥**

**अर्थ**-इस मन्त्र में उपमालङ्कार है। इस संसार में जो-जो शोभायुक्त रचना, प्रशंसा और धन्यवाद हैं, वे सब परमेश्वर ही की अनन्त शक्ति का प्रकाश करते हैं, क्योंकि जैसे सिद्ध किये हुए पदार्थों में प्रशंसायुक्त रचना के अनेक गुण उन पदार्थों के रचनेवाले की ही प्रशंसा के हेतु हैं, वैसे ही परमेश्वर की प्रशंसा जानने वा प्रार्थना के लिए हैं। इस कारण जो-जो पदार्थ हम ईश्वर से प्रार्थना के साथ चाहते हैं, सो-सो हमारे अन्यन्त पुरुषार्थ के द्वारा ही प्राप्त होने योग्य हैं, केवल प्रार्थनामात्र से नहीं॥५॥ किस-किस पदार्थ की प्राप्ति के लिए ईश्वर की प्रार्थना करनी चाहिए, सो अगले मन्त्र में प्रकाश किया है।

# 'आयुर्वेदेसंस्कृतस्यस्थानम्' विषये एकदिवसीय संस्कृतसंगोष्ठी

-डॉ. हरीशचन्द्र गुरुरानी

**हरिद्वारम्।** उत्तराखण्ड संस्कृत अकादम्या (उत्तराखण्डसर्वकारेण) संस्कृतस्य प्रचाराय, प्रसाराय, प्राच्यविद्यानां संरक्षणाय च 'आयुर्वेदे संस्कृतस्य स्थानम्' इत्यस्मिन् विषये एकदिवसीया संस्कृतसंगोष्ठी मार्चमासस्य 23 दिनाङ्के उत्तराखण्डसंस्कृतविश्वविद्यालये हरिद्वारे




समायोजिता।

कार्यक्रमस्य अध्यक्षतां कुर्वन् उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिना प्रो. पीयूष्कान्तदीक्षितमहोदयेन उक्तं यत् आयुर्वेदस्य सर्वेऽपि ग्रन्थाः संस्कृतभाषायां लिखिताः सन्ति। संस्कृतं बिना आयुर्वेदस्य पूर्णता नास्ति। तेन उक्तं संस्कृतच्छात्रा एव आयुर्वेदस्य ग्रन्थान् सम्यक्तया पठितुं शक्नुवन्ति।

संगोष्ठ्याः मुख्यातिथयः श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. भोला झामहोदयः उक्तवान् यत् संस्कृतस्य उत्थानाय संस्कृतसंस्थानां निष्क्रियता उचिता नास्ति। स्वातन्त्र्युत्तरकाले देशे अनेकाः संस्कृतसंस्थाः आसन् किन्तु भौतिकवादस्य प्रधानताकारणाद् संस्कृतसंस्थानां विलयः सामान्यसंस्थारूपेण सञ्जातः। येन संस्कृतस्य विकासे बाधा समुत्पन्ना।

संगोष्ठ्याः मुख्यवक्ता उत्तराखण्ड-आयुर्वेदविश्वविद्यालय-ऋज्ञिकुलपरिसरस्य निदेशकः अन्ताराष्ट्रियमर्मचिकित्साविशेषज्ञः प्रो. सुनीलकुमार जोशी अकथयत् यत् आयुर्वेदः वेदस्य उपभागः अस्ति। आयुर्वेदचिकित्सापद्धतिः अस्माकम् ऋषिणां निधिः अस्ति। आयुर्वेदस्य सम्यक् ज्ञानं संस्कृतज्ञानं बिना न सम्भवम्। यदि देशे आयुर्वेदाचार्याः संस्कृतं पठित्वा आयुर्वेदं पठिष्यन्ति तदा तेषां कृते आयुर्वेदचिकित्सापद्धतिः अधिकलाभाय भवेत् । प्रो. जोशिना आयुर्वेदस्य संस्कृतस्य च विषये अनेकानि उदाहरणानि प्रस्तूय संस्कृत-आयुर्वेदयोः वैशिष्ट्यं प्रतिपादितम्।

संगोष्ठ्याः अतिथिवक्ता उत्तराखण्ड-आयुर्वेदविश्वविद्यालय-गुरुकुलपरिसरस्य संस्कृतसंहितासिद्धान्तविभागाध्यक्षः प्रो. प्रेमचन्द शास्त्री उक्तवान् यत् भारतीय-आयुर्वेदचिकित्सायाम् इदानीं संस्कृतच्छात्राणां प्रवेशः नास्ति। तत्र केवलं ये विज्ञानं पठन्ति तेज्ञामेव छात्राणां प्रवेशः अस्ति। यदाहि सुश्रुतसंहिता, चरकसंहिता चेत्यादयः ग्रन्थाः संस्कृतभाषायां लिखिताः सन्ति, संस्कृतज्ञानं बिना कश्चिदपि विज्ञानछात्रः कथम् आयुर्वेदाचार्यः भवितुं शक्नोति? सर्वकारः आयुर्वेदविश्वविद्यालये महाविद्यालयेऽपि पारम्परिकसंस्कृतच्छात्राणां प्रवेशं कारयितुं शक्नोति येन संस्कृतच्छात्रा अपि आयुर्वेदं पठित्वा रोगोपचारं कर्तुं शक्नुयुः। एषा व्यवस्था उर्दू छात्राणां कृते आरम्भा अस्ति। तत्र उर्दू यूनानी चिकित्सकः भवति।


कार्यक्रमस्य विशिष्टातिथिः संस्कृतभारत्याः क्षेत्रीयसंघटनमन्त्री मा. प्रतापसिंहमहोदयः उक्तवान् यत् सर्वासां विद्यानां भाषाणां च प्रमुखाधारः संस्कृतमेव अस्ति। भारतीयं यत्किमपि चिन्तनम् अस्माकम् ऋषिभिः कृत तत् सर्वमपि संस्कृतभाषायां निहितम् अस्ति। अतः सर्वैरपि भारतीयैः संस्कृतं पठनीयं येन सर्वविद्याज्ञानं भवितुं शक्नोति।

कार्यक्रमस्य सञ्चालनं उत्तराखण्डसंस्कृतविश्वविद्यालयस्य सहायकाचार्येण डॉ. प्रकाशचन्द्र पन्तेन, अतिथीनां स्वागतम् प्रास्ताविकं भाषणं च उत्तराखण्डसंस्कृत-अकादम्याः शोधाधिकारिणा डॉ. हरीशचन्द्र गुरुरानिना कृतम्। कार्यक्रमस्य आरम्भे वैदिकं मङ्गलाचरणं, स्वागतगीतं, सरस्वतीवन्दना, योगप्रदर्शनं च सञ्जातम्।

कार्यक्रमे अकादम्याः प्रकाशनाधिकारी किशोरीलाल रतूडी, प्रो. दिनेश चमोला, डॉ. सुरेशचन्द्र त्यागी, डॉ. शैलेश तिवारी, डॉ. प्रतिभा शुक्ला, डॉ. हरीशचन्द्र तिवारी, डॉ. दामोदर परगाँई, डॉ. मनोजकिशोर पन्तः, डॉ. सुमन मिश्रा, डॉ. माधवी गोस्वामी, डॉ. वीणा विश्नोई, डॉ. वाणीभूषण भट्टः, डॉ. अरुण मिश्रः, डॉ. धीरज शुक्लः, नवीन पन्तः, मनोज गहतोडी चेत्यादयः उपस्थिताः आसन्।

# भारतस्य वायोवृद्ध संस्कृत-प्रचारक श्री दिनेशचन्द जोशी कीर्ति शेषमभवत्

संस्कृत-योत्र-आयुर्वेद, वैदिकाध्ययन, वैदिकगणित, रामायण, महाभारत, भगवद्गीता-प्राच्याविद्या इत्यादिनां संवधंने तत्पर



अन्तराष्ट्रिय संस्था ''स्वस्तिवाचनम्'' इत्यस्य संस्थापक गर्गगोगीय ब्राह्मणावंशावतंश आध्यात्पशिखरपुरूष श्री दिनेशचन्द्रजोशी कीर्तिशेष प्राप्तवान। भवतां संस्थायाः युवा संस्कृतविद्वान्सः एक दशकं भावत् अनेके युवाकान् संस्कृत पत्रकारितायां प्रवृत्य संस्कृत जगते नूतनआयामः स्थापितवान। भवान गुरुकुलीय शिक्षां व्यक्तित्व निर्माणस्य सर्वोच्च साधनमुक्तवान। भवान संस्कृते रूच्युत्पादनार्थ विवाहोत्सवे वैवाहिकमंत्र पत्र प्रस्तुत करणस्य अनुपम विचारं दत्वन्तः। भवतां एतादृशं विचारं सहर्ष सहस्त्र संस्कृत प्रेमी स्वीकारः कृतवन्तः।

पाठकानां कृते सूचनाः-
कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C ) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-
Sanskrit samvad,
Current A/C No. 224902000000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249

# आधुनिककवीनां काव्येशु मानवीयमूल्यानि

––डॉ अरविन्दकुमारतिवारी
आदर्शवैदिकविद्यानयइण्टरकालिजं,
नंगला–सिनौली, बागपतं, उत्तरप्रदेशः
9557410389
Arvindt490@gmail.com

कविरेकः प्रजापतिरिति सत्यमेवोक्तं सुजनवचनं मन्मानसं पावयति। धन्याः कवय य एवं मानवं सन्मार्गमारोहयन्ति। विदन्ति विज्ञातारो भवन्तो यत् कवीनां लेखन्यां भवति कश्चन आग्रहः, आदेशः, उपदेशः, यैः मार्गच्युतो जनो जननायको नष्टो वा स्वकर्मणि स्वयमेव संलग्नो भवति। कविरेव निस्पृहः सन् रामादिवत् वर्तितव्यं न रावणादिवदित्यपि शिक्षयति। अयमेव कविः मानवमूल्येषु परिगणितं दानदयादाक्षिण्यादिगुणवृन्दं स्वकाव्येन समुपदिशति।

अनेके प्रसृतकीर्तयः सुकवय आधुनिकयुगे दर्षष्टिपथमायान्ति, येषां काव्येषु मानवीयमूल्यानां प्रचुरं निदर्शनं भवति। किन्तु नैतत् समग्रमपि काव्यजातं कश्चिदपि पठितुं द्रष्टुं ज्ञातुं वा समर्थः अनुपलब्धेः समयानुरागाभावादिकारणादिति। किन्तु येषामपि दर्शनीयं काव्यं मया दृष्टं तेषां केषांचिदेव परिगणनमत्र क्रियते। सावहिताः परिषत्पतयः श्रृण्वन्तु धीमन्तः। महाकविरभिराजराजेन्द्रत्रिपाठिमहोदयः स्वसमकालीनकविकृतिविषये बहुधा निबन्धेषु मानवमूल्यविषये प्रोक्तवानस्ति, किन्तु अहं तानपहाय किंचिदन्यदेव वदामि।

अहमन्तेवासी आचार्यवासुदेवद्विवेदिशास्त्रिणाम्। सश्रद्धं प्रथमम् आधुनिकेषु त एव शिष्येण मया शोधनिबन्धेऽस्मिन् स्मर्यन्ते।

परमपूजनीया अस्माकं विख्याताभिधाना गुरवो बालेषु कथं मानवीयमूल्यानामाधानं भवेदिति विचिन्त्य बालकवितासु नैतिकगुणानां ग्रथनमकरोत्। को न जानाति। प्रातर्वन्दीयचरणैः तु परगुणाहरणार्थं चौरो भवेत्यपि सविनोदं परामष्टम्।

यथा

चौरो भव परगुणशतहरणे।

अग्रे गुररयं शिष्यान् प्रबोधयति। यज्जीवने अभिमानो न करणीयः। सर्वेषां वचनानि श्रोतव्यानि। तदित्थम्–

मा भव मानी मानय सर्वं।

आस्वादयन्तु बाला भूत्वा भवन्तः सुकवयः गुरुवरबालकवितावलिकाव्यरसमिति विचिन्तयन्नहं बालकविता आचार्याणां भवतां पुरतः प्रस्तौमि। यथा–

हे दयानिधे हे दयाधाम!
हे दयानिधे हे दयाधाम!
शिष्टा भवेम हम शिष्ट बनें
सभ्याः भवेम हम सभ्य बनें।
सत्यं वदेम हम सच बोलें
सुखिनो वसेम हम सुखी रहें।

अस्यां प्रार्थनायामाचार्यवरैः तत्सर्वमुक्तं यल्लघुबालानां कृते सामान्यतया समुपादेयमस्ति। न केवलं मनोरंजनमपितु बालोचितज्ञानमपि प्रदीयते।

अहो दिव्या इमा बालकविता बालसाहित्यमभिवर्धयन्ति। सावधानम् इति शीर्षकेन लिखिता कविता श्रोतव्यास्ति–

दुष्टैः सम्बन्धं मा योजय
दुष्टों से नाता मत जोड़ो
दुष्टैः पुरुषैः सह मा गच्छेः
दुष्टजनों के साथ न चलना।

अनेन प्रकारेण गुरुभिः बाल्यकाल एव मानवीयमूल्याथानाय सर्वे जना बोधिताः सन्ति।

नैतदेव विश्रुतकीर्तयो गुरवः अनेकानि मनोहराणि मानवीयमूल्यसम्पृक्तानि गीतान्यपि प्रौढानामस्माकं कृष्ते विरचितानि सन्ति। तदेकमेव संश्रूयताम्

दयामय देव दीनेषु दयादर्ष्टिः सदा देया।
मनुष्या मानवा भूत्वा इदानीं दानवाः जाताः।

आचार्यचरणो विलिखति परमेशभजनं प्रति प्रेरयन् मानवान् यत्

भज रे मानव मूढ मनोहरमेकं नाम रे
कृष्ण कृष्ण घनश्याम रे नाम।।
एतत् नाम परमरमणीयं ऋषिमुनिदेवदनुजवरणीयं
मनसा सदा सखे स्मरणीयं कलिमलदाम रे।

अस्मिन् गीते आदर्शमानवीयमूल्यं सन्निहितमवलोक्यते मया। य ईश्वरं मनसि निधाय कार्यं करोति न स पापं करोतीति भावोऽस्ति। मामनुस्मर युध्य चेति गीतावचनवत्।

अस्तु। अधुना महाकविः अभिराजराजेन्द्रमिश्रमहोदयानां काव्येष्वपि काचित् पीडा प्रकटिता या एवं वर्णिता यत् मानवाः नूनमेव परजनं पीडयन्ति। केचिद् धूर्ता इव धष्तधौतवस्त्राः जपमालिकाकराः त्रिपुण्ड्रललाटाः महाकविना व्यंग्यवचनेन एव विद्धाः।

गले जपमालिका भाले त्रिपुण्ड्रः कुशासनकटो हस्ते।
दर्ष्टं विश्वासयित्री कस्य नेयं सौम्यघार्मिकता।। मत्तवारिणी पृष्ठांकः 26

त्रिवेणीकविरयं व्यथां प्रकटीकुर्वन् लिखति यत्

देहि यस्मै यशो दिग्दिगन्ताश्रितं
तं निरीहं विधेहीति सम्प्रार्थये।
देहि यस्मै त्रिवेणीकवेर्जीवनं
तं सहिष्णुं विधेहीति सम्प्रार्थये।। मत्तवारिणी। 60

शालभंजिका गलज्जलिका महाकवेर्यत्र श्रवणीयं वचनं समुपलभ्यते। यथा

व्यथा येन भुक्ता दृगस्त्रं निपीतं
सुखेनैव तज्जीवनं हन्त वीतम्।
न येनार्चितं पादपद्मं खलानां
यशश्चारणी तस्य लोके प्रगीतं
महासत्त्वताया विचित्रो हि दण्डः
यदेकाकिनायुर्मृगेन्द्रेण नीतं
यशःप्रार्थिना सत्कवीनां मयापि
कृतघ्नायनं नाम काव्यं प्रणीतम्।। पृष्ठं 18

अस्यां मानवीयमूल्यानां समाजे कीदृशी स्थितिरिति सम्यग् वर्णिता अभिराजगुरुभिरिति वक्तुमपि जिह्वा कम्पते। खलाः प्रतिभावन्तं पीडयन्ति, तं परित्यजन्त्यपि इति सर्वमपि एकस्मिन्नेव काव्ये महाकविना व्यथितहष्दयेन वर्णितम्।

अस्तु कवीनां परम्परायां अस्य भगवानदाससंस्कृतमहाविद्यालयस्य आचार्यो निरंजनमिश्रमहोदयो वर्तते, येन महाकाव्यद्वयं विरचितम्, अनेकानि काव्यानि विरचितानि। यानि पाठं पाठं मनो नः सर्वदा नन्दति। प्रमत्तगीतं श्रीमिश्रमहोदयस्य मनोहारिणी रचना वर्तते। यत्र मानवमूल्यानां ह्रासं विलोक्य विदीर्णहृदयो लिखति स्वभावान्। कालजयी रचनास्य सुकवेः गंगापुत्रावदानं यद्धि सम्पूर्णमानवानां कष्ते उपकारि मन्तुं शक्यते। अनेन कविना श्रीमता स वन्दनीयपादः सन्यासिवरः निगमानन्दो महोदयः सादरं स्मष्तः। येन स्वजीवनं परस्मै प्रदत्तम्। अस्मिन् महाकाव्ये पदे पदे मानवीयमूल्यानां दर्शनं भवति। श्रूयतां भवद्भिः।

भ्रष्टतन्त्रं यदा वर्धते भूतले
ज्ञानदीपस्य तैलं तदा शुष्यति।
अन्धकारे क्व रत्नं क्व वा मृत्तिका
केन सम्भावयेत् केन वा किं त्यजेत्। 17/25

कविवरो विलिखति यत् यदि देहापर्णेन जगद्धितं भवति तत्करणीयम्।

यथा–सत्कार्यसिद्धौ न शरीररक्षा
पश्यन्ति मानैकधना गुणज्ञाः।
शरीरमेतत् ननु धर्मकार्ये
न साधनादन्यतरं कदापि।। 21/51

सुकवेर्निरंजनमिश्रस्य द्वितीयं महाकाव्यं ग्रन्थिबन्धनमद्भुतमस्ति। यत्र मानवीयमूल्यानां सम्यड्निदर्शनकृतमस्तीति मया पठता समनुभूतम्। यथा श्रूयते समानशीलव्यसेषु मैत्री तद्वदेव कविरयं प्रसंगानुकूलं विरचितवान् वर्तते।

तद्यत्

समानमानेन हि माननीयाः
सम्बन्धमास्थापयितुं सयत्नाः।
नतोन्नताभ्यां स्खलनस्य भीतिः
भूमौ भवत्येव हि सज्जनानाम्।। 5/24

प्रायो दृश्यते, असमानानां मैत्री सम्बन्धो वा क्षीयत एव। अतः समानेन सह सम्बन्धो विधेय इति मानवीयमूल्यमालिखितमिवाभात्यस्मिन् महाकाव्ये।

विदुषां समाजे अनर्गलं वचनं न वाच्यमिति मानवीयमूल्यमेवास्ति। सुकविरयं विवष्णोति।

तथा न वाच्यं विदुषां समाजे
जडत्वबुद्धिः प्रथितास्तु येन।
वाचैव कश्चिल्लभते प्रतिष्ठां
तथैव कश्चिच्च मुखे चपेटाम्।। 7/35

अस्मन्मित्रमणिना महामहोपाध्यायेन डॉ राजेन्द्रत्रिपाठिरसराजमहोदयेन स्वगीतिकाव्ये रसराजतोषिणीनामके मानवीयमूल्यह्रासविषये महती चिन्ता प्रकटीकष्ता। सुहृदा प्रोच्यते यत्

समाजे संस्कर्षतिः शिक्षा न जाने कुत्र संयाता।
किमर्थं दुर्गतिर्हानिर्हताशा वा समायाता।
यदीया वा त्वदीया वा यथा दुर्भावना व्याप्ता।
तदा ग्रामे कुले देशे विपत्तिः किन्न सम्प्राप्ता।।
असूयालोचनाद्वेषा कुदृष्टिर्बाधिताः लोके।
दयादानादिसद्बुद्धिर्न जाने कुत्र निर्याता। रसराजतोषिणी पृ057

आधुनिककाव्यधारा सम्प्रति मानवीयमूल्यं सर्वत्र संवाहयति। येन कश्चिदग्रजः कविवरो रामविनयसिंहाख्यो विलिखति–

सैकतं तत्तटं त्वामहो पृच्छति
नीलनीहारकं त्वामहो पृच्छति।
तेऽश्रुसम्प्लावनेऽथो निमग्ना स्वयं
हष्दगतं वेदनं त्वामहो पृच्छति।। मुक्ताशती 45

मानवीयमूल्यं प्रदर्शयन् कविवरो वनमाली विस्वालो विलिखति–

तुलस्या मूले चेत् प्रथयति न दीपं सुगृहिणी
समर्चां वै कष्त्वा धमति शुभशंखं प्रमुदिता।
नवोढानां श्रद्धा यदि भवति वेदाश्रितविधौ
तदा राष्ट्रप्रीतिः प्रवहति नवीना मनसि मे।। काव्यामृतवर्षिणी 2017 द्वितीयोऽकं शिखरिणीविशेषांकः।

सम्प्रति देशे कीदृशी सभ्यता समायाति कथं मानवीयं मूल्यं दष्श्यते इति कविवररहसबिहारिद्विवेदिमहोदयानां काव्यमिदं स्पष्टीकरोति। यथा

पाति योऽसौ पिता भारते कथ्यते
किन्तु तस्मै हलो डैड सम्बोध्यते।
मान्यते या सुमाता ममी कथ्यते
भारतेऽसभ्यताहर्निशं वर्धते।। पद्यबन्धा–11 पृ0 39

सुकविना मित्रेण उत्तराखण्डवास्तव्येन डॉहेमचन्द्रबेलवालेन परिवर्तनकाव्ये परिक्षीयमाणमानवीयमूल्यानां दर्शनं कारितम्। असौ सखा विलिखति यत् जनैः प्रकृतिः दूष्यमाणा वर्तते। अतः क्वचिदपि भ्रमितुं समीहा न जागर्ति। तस्मादेव कारणात्कवयो गेहे तिष्ठन्तो विरचयन्ति काव्यम्। यथा–

भूत्वा गृहे तु कविना कविताः क्रियन्ते
कस्माद् भवेत् प्रकृतिरूपमतोऽत्र काव्ये।
गन्तुं हि चेच्छति कदाचिदपि क्वचित्स
स्थानं यतोहि न शुचि भ्रमणाय तस्य।। परिवर्तनशतकं 35 अत्र तेन चित्रितं यत् कवीनामेतदपि दायित्वं यत् स्वच्छताविषयेऽपि काव्यानि लेखनीयानि सन्ति। केवलं मण्डनेनैव न प्रकृती रक्षिता भविष्यति।

अनेनैव प्रकारेण सम्प्रति संस्कृतकाव्यधारा प्रवहन्ती समग्रमपि भूमण्डलमाप्लावयन्ती प्रवर्ततेतराम्।। अत्र कश्चित् मामको बन्धुवरो राजकुमाराभिधानः कविरेवं कामयते यत्

हे प्रभो संविधेयं पुनस्तादृशं
यत्र वेदध्वनिर्विप्रपूजा भवेत्।
निर्भयाः सुप्रसन्ना भवेयुः स्त्रियो
वैभवेनोन्नतं सुन्दरं भारतम्।। भारतभूषणम् 114

अये विदितमानवीयमूल्या विद्वांसः! दहति यदा कदा चित्तं विलोक्य मत्सरग्रस्तानां वचनं तदा विगलितहष्दयो मादष्शः कश्चिदेवं विलिखति। यथा–

गवेन्द्रो गवेन्द्रं कपीन्द्रं कपीन्द्रो
बुधेन्द्रं बुधेन्द्रः खगेन्द्रं खगेन्द्रः।
वनेन्द्रं वनेन्द्रो द्विपेन्द्रं द्विपेन्द्रः
कवीन्द्रः कवीन्द्रं विलोक्याद्य दूनः।। नीतिकल्पद्रुमः 116

अस्तु तावत् मदीयं वक्तव्यमेतदेव यत् आधुनिककवयः निरन्तरं काव्यं रचयन्तो वर्तन्ते। यत्र मानवीयमूल्यानां प्रतिपदं निदर्शनं भवत्येवेति नात्र संशयो विधेयः। बहवो विश्रुताः कवयः समयाभावात् निबन्धकलेवरवष्द्धिभयाद्वा मनसि वर्तमानाः सन्ति। तेषां विषये यथावसरं व्याख्यानं प्रदास्यते। अधुना एतदेव हष्दगतं भावं प्रोच्य स्ववक्तव्यं समाप्नोमि।

अमरवाणी विजयताम्।

संकेतः–

1 बालकवितावलिः आचार्यवासुदेवद्विवेदिशास्त्रिविरचितम्।
2 मत्तवारिणी प्रो अभिराजराजेन्द्रमिश्रः,
3 शालभंजिका प्रो अभिराजराजेन्द्रमिश्रः
4 गंगापुत्रावदानम् डॉ निरंजनमिश्रः
5 ग्रन्थिबन्धनम् डॉ निरंजनमिश्रः
6 रसराजतोषिणी महामहोपाध्यायः राजेन्द्रत्रिपाठी रसराजः।
7 मुक्ताशती डॉ रामविनयसिंहः
8 परिवर्तनशतकम् डॉ हेमचन्द्रबेलवालः
9 भारतभूषणम् डॉ रामकुमारमिश्रः

# ‘मनोगतम्’ – 42

## प्रसारण-तिथिः – 25.03.2018

### – भाषान्तर-कर्ता – बलदेवानन्द-सागरः

मम प्रियाः देशवासिनः !नमस्कारः।

अद्य रामनवमी – इति पावनं पर्व वर्तते । रामनवम्याः पवित्र-पर्वणि देशवासिनां कृते मम अनेकाः शुभकामनाः। पूज्य-बापू-वर्यस्य जीवने ‘राम-नाम्नः’ शक्तिः कियती आसीद्- इति तस्य जीवने प्रतिपलं सुसिद्धम्। विगतेषु दिनेषु जान्युआरि-मासे षड्-विंशे दिनाङ्के यदा[ASIAN]आसियान-देशानां सर्वे प्रतिनिधि-महानुभावाः अत्र आसन्, तदा स्वीयानि सांस्कृतिक-वृन्दानि सहैव आनीतवन्तः तथा च विषयोह्ययम् अतितरां गौरवास्पदं यत् तेषु अधिसंख्यं देशाः रामायणमेव अस्माकं समक्षं प्रस्तुवन्ति स्म। अर्थात् रामः रामायणञ्च, न केवलं भारते अपितु विश्वस्य अस्मिन् भूभाग ASIAN-देशेषु च, अद्यापि तावतीमेव प्रेरणां तावन्तमेव च प्रभावमुत्पादयतः। अहं पुनरेकवारं भवद्भ्यः सर्वेभ्यः रामनवम्याः शुभकामना व्याहरामि।

मम प्रियाः देशवासिनः ! प्रति-वारमिव साम्प्रतमपि अहं भवतां सर्वेषां बहूनि पत्राणि, email-सन्देशान्, phone-call- इति दूरभाषाकारणाः, विविधाश्च टिप्पणीः प्राप्तवान्।

कोमल-ठक्कर-जी ! MyGov-इत्यत्रसंस्कृतस्य on-line courses-इति सद्यस्कः पाठानाम् आरम्भार्थं भवतः निवेदनम् अहं पठितवान् । भवान् IT professional - इति सूचना-प्रविधि-व्यवसायी, युगपदेव, संस्कृतं प्रति भवतः प्रेमाणं दृष्ट्वा मोमुद्यते मम मानसम् । अस्यां दिशि विधीयमानानां प्रयासानां विषये भवन्तं सूचयितुम् अहं सम्बद्ध-विभागं निरदिशम्।‘मन की बात’-प्रसारणस्य श्रोतारः ये संस्कृत-विषये कार्यरताः सन्ति, तान् अपि अनुरुन्धे यत् तेह्यपि विषयमेनं परिशीलयन्तु परामर्शयन्तु च यत् केन प्रकारेण कोमल-ठक्कर-महोदयस्य परामर्शस्य कार्यान्वयनं भवेदिति।

बिहार-राज्यस्य नालन्दा-जनपदस्य बराकर-ग्रामतः श्रीमान् घनश्याम-कुमारःNarendra- ModiApp- इत्यत्र निज-विचारान् अलिखत्, तान् अहम् अपठम्। भूम्यन्तः अपचीयमानं जल-स्तरम् अधिकृत्य भवता या चिन्ता प्रकटिता, सा निश्चित-रूपेण अतितरां महत्वपूर्णास्ति।

कर्नाटकतः श्रीमान् शकल-शास्त्री-जी, भवान् शब्दानां सुतरां सुन्दर-सामञ्जस्येन अलिखत् यत्‘आयुष्मत् भारतम्’ तदैव भविष्यति यदा ‘आयुष्मती भूमिः’ भविता, तथा च, ‘आयुष्मती भूमिः’ तदैव भविता यदा वयं भूमौ निवसतां प्रत्येकमपि प्राणिनां विषये चिन्तयिष्यामः। ग्रीष्मर्तौ पशु-पक्षिणां कृते जल-पात्राणि स्थापयितुमपि भवान् सर्वान् साग्रहं निवेदितवान्। शकल-महोदय ! भवतः एताः भावनाः सर्वेभ्यः श्रोतृभ्यः ज्ञापितवान्।

श्रीमान् योगेश-भद्रेश-जी, भवतः आग्रहः अस्ति यद् अस्मिन् क्रमे अहं यूनां स्वास्थ्य-विषये तैः सम्भाषणं कुर्याम्। सः आमिनोति यत् एशिया-राष्ट्रैः साकं तुलनां करवाम चेत्, अस्मदीयाः युवानः शारीरिक-दृशा दुर्बलाः सन्ति। योगेश-जी ! विचारयामि यत् साम्प्रतं स्वास्थ्य-विषयम् अधिकृत्य विस्तरेण सर्वैः सम्भाषेय - Fit India-विषये च संवदेयम् । तथा च, भवन्तः सर्वे नव-युवानः सम्भूय Fit India- इति अभियानमपि प्रचालयितुं शक्नुवन्ति।

विगतेषु दिनेषु France-राष्ट्रपतिः काशी-यात्राम् अकरोत्। वाराणस्याः श्रीमान् प्रशान्तकुमार-मिश्रः अलिखत् यत् तस्याः यात्रायाः सर्वाण्यपि दृश्यानि, मनोहराणि प्रभावकराणि चासन्। तथा चासौ, तानि सर्वाणि चित्राणि, दृश्य-मुद्रिकाश्च, social media- इति सामाजिक-सञ्चार-माध्यमेषु प्रचारयितुं साग्रहं न्यवेदयत्। प्रशान्त-जी ! भारत-प्रशासनं तानि चित्राणि तस्मिन्नेव दिने सामाजिक-सञ्चार-माध्यमेषु NarendraModiApp- इत्यत्र च सम्विभाजितवत् । इतः परं भवान् like-re-twit– इति प्रोचनं पुनःस्फुरणं च करोतु, निज-मित्रेभ्यः अपि प्रेषयतु।

Chennai-तः अनघा, जयेशः अपरे च बालाः Exam Warrior- इतिपुस्तकस्य पृष्ठ-भागे मुद्रितानि gratitude cards- इति कृतज्ञता-पत्राणि आलक्ष्य स्वीयान् हार्दिकान् विचारान् लिखित्वा मह्यमेव प्रेषितवन्तः। अनघे ! जयेश ! अहं भवतः सर्वान् बालान् ज्ञापयितुं वाञ्छामि यत् एतेषां भवत्-पत्राणां कारणात् मदीया दिन-व्यापिनी श्रम-क्लान्तिः झटिति व्यपगच्छति। एतावन्ति पत्राणि, एतावत्यः दूरभाषाकारणाः, भूयस्यः टिप्पण्यः चैतासु यत्किमपि पठितवान्, यत्किमपि श्रोतुम् अपारयम्, अत्र चानेके बिन्दवः मम हृदय-स्पर्शिनः वर्तन्ते - तेषु केवलं कान्श्चन अन्यतमान् बिन्दून् आलक्ष्य एव वदानि चेत् तथापि, स्यात् अनेक-मास-पर्यन्तं मया सततं किञ्चित् किञ्चित् कथनीयमेव भविष्यति।

अद्यतन-क्रमे पत्राणाम् अधिसंख्यं बालानामेव वर्तते ये हि परीक्षा-विषये अलिखन्। ते च अवकाश-दिनानां स्वीय-कार्यक्रमान् सम्विभाजितवन्तः। ग्रीष्मर्तौ पशु-पक्षिणां पेय-जल-विषयिणीं चिन्तां प्रकटितवन्तः। कृषक-मेलकानि कृषिञ्च आधृत्य यानि कार्याणि अशेष-देशे प्रवर्तन्ते, कृषक-भगिनी-भ्रातॄणां पत्राणि प्राप्तानि। जल-संरक्षण-विषयकाः केचन परामर्शाः सक्रिय-नागरिकैः प्रेषिताः सन्ति। यदा प्रभृति वयं मिथः ‘मन की बात’-प्रसारणस्य माध्यमेन सम्भाषणं कुर्मः, तदा प्रभृति निदर्शमेकम् अहम् अवालोकयं यत् ग्रीष्मर्तौ प्रायेण पत्राणि, ग्रीष्म-विषय-सम्बद्धानि भवन्ति। परीक्षातः पूर्वं विद्यार्थि-मित्राणां चिन्ता-सम्भरितानि एतानि पत्राणि भवन्ति। festival season- इति पर्वर्तौ अस्माकं पर्वाणि, समुत्सवान्, अस्मदीयां संस्कृतिं, अस्माकीनाः परम्पराश्च अभिलक्ष्य तद्-विषयकाणि इमानि पत्राणि समायान्ति। अर्थात् मनोगतानि ऋतुना साकमपि परिवर्तन्ते तथा च, स्यात् इदमपि सत्यं यत् अस्मदीयानि मनोगतानि, कदाचित् कस्यचित् जीवने ऋतुमपि परिवर्तयन्ति। अपि च, कथन्न एवं भवेत् ? भवन्-मनोगतेषु, एतेषु भवदनुभवेषु, एषु भवदुदाहरणेषु, एतावती प्रेरणा, तावती ऊर्जा, एतावत्प्रकारकम् आत्मीयत्वञ्च, राष्ट्रस्य कृते किमपि नूनं रचनात्मकं करणीयमिति भावो भवति, भाव-सम्भृतानि एतानि मनोगतानि भवन्ति। एतानि तु अशेष-राष्ट्रस्यापि ऋतुं परिवर्तयितुं प्रभवन्ति। यदा अहं भवत्-पत्राणि पठित्वा जानामि यत् केन प्रकारेण असम-राज्यस्य करीमगंजस्य रिक्शा-चालकः अहमद-अली स्वीयेन इच्छाशक्ति-बलेन नव-संख्याकान् विद्यालयान् निर्मितवान् - तदा अस्य देशस्य अदम्यायाः इच्छाशक्तेः दर्शनं भवति यदाहं कानपुरस्य डॉक्टर-अजीत-मोहन-चौधुरिणः कथाम् अशृणवम् यत् सः foot-path-इति पाद-मार्गेषु गत्वा निर्धनानां निःशुल्कम् उपचारं करोति, निःशुल्कञ्च औषधिमपि ददाति - तदा अस्य देशस्य बन्धु-भावम् अनुभवितुं अवसरो लभ्यते। त्रयोदश-वर्ष-पूर्वं, काले समुपचारः नैव लब्धः, एतस्मात् कारणात् Kolkata-नगरस्य भाटक-यान—चालकस्य सैदुल-लस्करस्य (SaidulLaskar) भगिनी मृता - सः चिकित्सालयस्य निर्माणार्थं दृढतया संकल्पितवान् येन न कश्चन निर्धनः उपचारस्य अभाव-कारणात् म्रियेत। सैदुलः स्वीय-संकल्प-पूर्त्यर्थं गृहस्य आभूषणानि विक्रीतवान्; दान-माध्यमेन धनं संगृहीतवान्। तस्य ष्टड्ढ-इति भाटकित-कार-यानेन यात्रा-कर्तारः अनेके यात्रिणः उदारतया दानम् अकुर्वन् । एकाअभियन्त्री पुत्री तु स्वीय-प्रथम-वेतनस्य समग्रामपि राशिं प्रादात्। एवं रीत्या धन-संग्रहं कृत्वा द्वादश-वर्षाणाम् अनन्तरम्, अन्ततोगत्वा सैदुल-लस्करः यं भागीरथं प्रयासमकरोत्, सः साकारीभूतः तथा च, साम्प्रतं तस्य कठोर-परिश्रम-कारणात्, तत्-संकल्प-बलेन कोलकाता-पार्श्वे पुनरी-(punri)-ग्रामे प्रायेण त्रिंशत्-शायिकानां क्षमतायुतः चिकित्सालयः निर्मितो जातः। एषा अस्ति New India– इति नूतन-भारतस्य शक्तिः ! यदा उत्तरप्रदेशस्य काचित् महिला अनेकेषु संघर्षेषु सत्सु सपाद-शतं शौचालयान् विनिर्मीति तथा च, निजाधिकार-प्राप्त्यर्थं महिलाश्च प्रेरयति -तदा नूनं मातृ-शक्तेः दर्शनं भवति। एतादृशाः अनेके प्रेरणा-पुलकाः मम देशस्य अभिज्ञानं कारयन्ति। अद्यत्वे कृत्स्नेह्यपि जगति भारतं प्रति मन्तव्य-संधारणस्य दृष्टिः परिवर्तितास्ति। साम्प्रतं यदा, भारतस्य नाम सुबहु सम्मान-पुरस्सरं आधीयते, तदा एतत्-पृष्ठ-भूमौ मातुः भारत्याः एतेषां पुत्री-पुत्राणां परमो हि पुरुषार्थः गुप्तः सन् विराजते। अधुना सम्पूर्णेह्यपि देशे, युव-जनेषु, महिलासु, पश्चवर्तिषु, निर्धनेषु, मध्यम-वर्गीयेषु, प्रतिवर्गीयेषु च जनेषु विश्वासोह्ययं जागृतः यत् नूनं ! वयम् अग्रे गन्तुं शक्नुमः, अस्मदीयोह्ययं देशः अग्रेसर्तुं पारयति। आशाभिलाष-सम्भरितस्य आत्मविश्वासस्य सकारात्मकः परिवेशो विवर्धितोह्यस्ति। अयमेव आत्मविश्वासः, इयमेव च रचनात्मिका प्रवृत्तिः नूतन-भारतस्य अस्मदीयं संकल्पं साकारीकरिष्यति, स्वप्नञ्च सुसिद्धं विधास्यति।

मम प्रियाः देशवासिनः, भाविनः केचन मासाः कृषक-भगिनी-भ्रातॄणां कृते अतितरां महत्वाधायिनः सन्ति । अत एव अनेकानि पत्राणि, कृषि-विषयकाणि मया प्राप्तानि । अस्मिन् समये अहं दूरदर्शनस्य DD Kisan Channel- इत्यत्र कृषकैः साकं याः चर्चाः विधीयन्ते, तासां दृश्याङ्कन-मुद्रिकाः अपि आहृत्य अवालोकयम् तथा चानुभवामि यत् प्रत्येकमपि कृषकः दूरदर्शनस्य DD Kisan



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

Channel-इति वाहिकया नूनं सम्पृक्तः स्यात्, सः नूनमेनां पश्येत् तथा च, एतान् प्रयोगान् निज-क्षेत्रेषु क्रियान्वितान् विदध्यात्। महात्म-गान्धितः आरभ्य भवतु नाम श्रीलाल-बहादुर-शास्त्री,लोहिया-महोदयः वा चौधरी-चरण-सिंहो भवतु वाचौधरी- देवीलालः - सर्वेह्यपि कृषिं कृषकान् च देशस्य अर्थव्यवस्थायाः जन-जीवनस्य च अनन्यतम-महत्वपूर्णाङ्गत्वेन स्वीकृतवन्तः। मृत्तिका, क्षेत्राणि यवखलाः कृषकाः चैतैः साकं महात्म-गान्धिनः कियती प्रसक्तिः आसीत् - तद्-विषयकाः भावाः तस्य अस्यां पंक्तौ प्रतिबिम्बायन्ते -‘To forget how to dig the earth and to tend the soil - is to forget ourselves.’

अर्थात्, धरण्याः खननं मृत्तिकायाः च परिरक्षणं यदि वयं विस्मरामः चेत्, इदन्तु आत्म-विस्मरण-तुल्यं भविता । एवमेव, श्रीलाल-बहादुर-शास्त्री पादप-वृक्ष-वनस्पतीनां संरक्षणस्य समीचीन- कृष्याधार-स्वरूपस्य चावश्यकतां सर्वदैव सबलं ख्यापयन् आसीत्। डॉ०राममनोहर-लोहिया अस्मदीय-कृषकाणां कृते समीचीनम् आयं, भद्रताराणि सेचन-सौविध्यानि च सुनिश्चेतुं खाद्यानि दुग्धोत्पादनानि च विवर्धयितुं व्यापिन्याः जन-जागृतेः आवश्यकताः व्याहरत्। विगते शताब्दे ऊनाशीति-तमे वर्षे व्याहृतेह्यभिभाषणे चौधरी-चरण-सिंहः नूतनं प्रविधिं प्रयोक्तुं, अभिनवाचारान् अङ्गीकर्तुं च तद्विषयकावश्यकतायै कृषकान् साग्रहं अध्यार्थयत्। नातिचिरम् अहं दिल्ल्याम् आयोजितं कृष्युन्नति-मेलकम् अवलोकयितुमगच्छम्। तत्र कृषक-भगिनी-भ्रातृभिः वैज्ञानिकैश्च साकं मम संवादः, कृषि-विषयकाणाम् अनेक-विधानुभवानाम् अवगमनम्,कृषि-सम्बद्धानां नवाचाराणां बोधः - एतत् सर्वं मम सुखदानुभवत्वेन आसीदेव, परञ्च मां सर्वाधिकन्तु प्राभावयत् मेघालयस्य तत्रत्यानां च कृषकाणां परिश्रमः। अल्प-क्षेत्रफल-युतम् एतत् राज्यं बृहत्-कार्यप्रदर्शनम् अकरोत्। मेघालयस्य अस्मदीयाः कृषकाः विगत-वित्त-वर्ष-द्वयावधौ, प्राक्तन-वर्ष-पञ्चकस्य तुलनायां शस्योत्पादनस्य आभिलेख्यं प्रमाणितवन्तः। तैः इदं प्रदर्शितं यत् लक्ष्यं यदा सुनिर्धारितं भवति, समुत्साहः प्रोन्नतः अस्ति, मनसि च संकल्प-शक्तिः प्रवर्तते चेद्, तत् सिद्धं विधातुं शक्यते, एवं कृत्वा प्रदर्शयितुं पार्यते।

साम्प्रतं कृषकाणां श्रमः प्रविधेः साहचर्यमवाप्नोति, एवं हि, कृष्युत्पादकाः पर्याप्तं बलमवाप्नुवन्। विगते मासे एकस्मिन् कार्यक्रमे अहं Organic Products– इति जैवोत्पादानां कृते E-Marketing portal– इति अन्तर्जाल-विपणन-द्वारकस्य,एकस्याः website- इति जाल-दृश्य-वाहिकायाः प्रवर्तनावश्यकतां ख्यापितवान्, येन Organic Products-इति जैवोत्पादान् क्षेत्रतः विपणीं यावत् तथा च, विपणीतः सामान्य-जन-पर्यन्तं सरलतया प्रापयितुं शक्येत। प्रसन्नोह्यस्मि यत् मासावधौ एव, एतत् portal- इत्यन्तर्जाल-द्वारकम् आरब्धम्। दृढेच्छा-शक्त्या साकमेव निर्धारित-काले एतत् प्रवर्तितम् येन हि, समधिकाः कृषकाः अमुना संयुताः भवेयुः, एतस्मात्ते लाभान्विताः भवेयुः, ते च त्वरित-गत्या विकास-मार्गोपरि अग्रेसरेयुः । मया यानि पत्राणि अधिगतानि, तत्राहम् पश्यन्नासं यत् कृषकाणामधिसंख्यं MSP-इति न्यूनतम-समर्थन-मूल्य-विषये अलिखत् तथा च ते समीहन्ते यदहं तैः सार्धं विस्तरेण सम्भाषणं कुर्याम्।

भ्रातरः भगिन्यश्च, ऐषमः महाय-व्यय-पत्रके कृषकेभ्यः शस्य-पाकानां समीचीन-मूल्यानि प्रदापयितुं महान् निर्णयः विहितः। एतद्धि निर्णीतं यत् अधिसूचितानां शस्य-पाकानां कृते MSP-इति न्यूनतम-समर्थन-मूल्यं, तद्विनिवेशित-मूल्यस्य प्रायेण न्यूनात्न्यून सार्धैक-गुणितं घोषयिष्यते। यदि विस्तरेण सूचयेयं चेत् न्यूनतम-समर्थन-मूल्यस्य कृते यः विनिवेश्यः व्ययः संयोजयिष्यते तस्मिन् अपरेषां परिश्रम-निरतानां श्रमिकाणां पारिश्रमिकः, निज-पशूनां वा यन्त्राणां आहोस्वित्, भाटकितानां पशूनां यन्त्राणाञ्च व्ययः, उर्वरक-मूल्यम्,बीज-मूल्यम्, उपयुक्तस्य सर्व-प्रकारकस्य उर्वरकस्य मूल्यम्, सेचन-व्ययः, राज्य-सर्वकाराय प्रदत्तः भू-राजस्वः, मूलधनोपरि प्रदीयमानं कुसीदं, यदि भूमिखण्डं भाटकितमस्ति चेद्, तस्य भाटकम्,

तथा च एतावदेव नैव,कृषकः यः स्वयं श्राम्यति वा तस्य कश्चन कौटुम्बिक-जनः कृषि-कार्येषु श्रमस्य योगदानं करोति चेत्, तस्य मूल्यमपि उत्पादन-व्यये संयोजनीयं भविष्यति। एतदतिरिच्य,कृषकाः निज-शस्यपाकानां समुचितं मूल्यमवाप्नुयुः इति कृत्वा देशे Agriculture Marketing Reform– इति कृषि-विपणन-परिष्काराः अपि अतितरां व्यापक-स्तरेण विधीयन्ते। ग्रामस्य स्थानिकाभिः विपणीभिः, Wholesale Market- इति समग्र-विपणीभिः, अन्ते च Global Market- इति विश्व-विपणीभिः साकम् एते संयोजिताः भवेयुः - एतदर्थमपि प्रयत्यते। कृषकैः स्वीयोत्पादानां विक्रयणार्थं बहुदूरं नैव गमनीयं स्यादिति कृत्वा देशे द्वाविंशति-सहस्रं ग्रामीण-हट्टाः आवश्यकाधार-स्वरूपेण समुन्नीताः सन्तः APMC– [Agricultural produce market committee] e-NAM platform- इत्याभ्यां साकमेव संयोजयिष्यन्ते। अर्थात् क्षेत्रतः देशस्य कयाचिदपि विपण्या साकं संयोजनम् -इत्येतादृशं व्यवस्थाप्यते। साम्प्रतं कृषकाणाम् अनेकविधानि तादृन्शि वृत्तानि श्रूयन्ते यत्रै: Soil Health Card- इति भू-निरामय-पत्रानुसारेण अधिगतायाः निज-भूमि-सूचनायाः अनुसारेण शस्य-परिवर्तनं कृत्वा समुचित-मात्रया उर्वरकं कीटनाशकञ्च उपयुज्य कृषिः कृता। एवं हि उत्पादनन्तु एधितमेव, युगपदेव व्ययोह्यपि अपचितः, विनिवेश-शुल्कमपि न्यूनीभूतम्। साम्प्रतं शस्यागोपस्य अन्तर्गतं सम्प्राप्या Claim-इत्यधिकृत-राशिः द्विगुणिताधिका जाता, येन कृषकाः विगत-चिन्ताः सन्तः कृषि-कार्याणि कुर्युः। कौशेयोद्योगं द्रढयितुं आगामि-वर्ष-त्रये द्वि-सहस्र-कोटि-रूप्यकतोह्यपि अधिकः व्ययो विधास्यते। कौशेयोद्योगे अनुसन्धानस्य प्रविधेश्च प्रयोगं संवर्धयितुं सविशेषं प्रयतिष्यते। देशे कृमि-कोष-केन्द्राणां संख्या द्विगुणितोह्यपि अधिकां विधातुं प्रस्तूयते। कृषकाः कृषि-कार्यस्य आरम्भात् अन्त-पर्यन्तं कथङ्कारमपि काठिन्यं नैवानुभवेयुः इति कृत्वा पूर्णमपि अवधानम् अस्यां दिशि प्रदीयते। तानि भवन्तु नामआधुनिक-बीजानि वा विद्युत्-सौविध्यानि, तद् भवतु नाम उत्पाद-संरक्षणंवा तस्य विपणीं यावत् सन्नयनम् - प्रत्येकमपि पक्षं विशेषावधान-पुरस्सरम् अनारतं परिष्कर्तुं सततं प्रयत्यते।

मम प्रियाः देशवासिनः, सद्यः कृषक-विषयकस्य संवादस्य अवसरे अहं चम्पारण-स्मृतिम् अनुभवामि। को नामचम्पारण-भूमिं विस्मर्तुम् अर्हति ? परम-पूज्यः बापू-चरणः देशं स्वतन्त्रं कर्तुं शत-वर्ष-पूर्वम् अस्मादेव भूभागात् सत्याग्रहान्दोलनम् आरभत। यथा बापू-चरणः चम्पारण-भूमितः देशं स्वतन्त्रयितुं संकल्पितवान्, तद्वदेव 'स्वच्छ-भारता'भियानस्य अन्तर्गतं वयं सर्वे देशम् अस्वच्छतातः मोचयितुं संकल्पितवन्तः। तस्याभियानस्य नाम आसीत् 'सत्याग्रहः', तथा चाद्य यदभियानं वयं प्रवर्तितवन्तः, सः अस्ति- 'स्वच्छाग्रहः'। स्वाधीनतायाः प्राप्ते: अनन्तरं शास्त्री-जी 'जय जवान - जय किसान'- इति समाघोषम् उद्घोषितवान् तथा च, देशस्य अन्न-भाण्डाराणि संभर्तुं, देशञ्च आत्मनिर्भरं विधातुम् अस्मदीयाः कृषकाः सर्वात्मना प्रायतन्त। तद्वदेव 'स्वच्छ-भारता'भियानं द्राक् पश्यता एव जनान्दोलन-रूपम् अवाप्नोत् महात्म-गान्धिनः स्वप्नं साकारयितुम् अस्यां दिशि महती सफलता अधिगतास्ति। अनेन एतद् सुसिद्ध्यति यत् यदा सर्वकारः समाजश्च, सम्भूय कार्यं कुरुतः, तदा सफलता सुनिश्चिता भवति। 'सत्याग्रहान्दोलनस्य' शताब्द-पूर्णतावसरे आगामिनि मासे दश-दिनाङ्के अहं चम्पारणस्य पावन-भूमिं गमिष्यामि यत्र एतादृशानां स्वच्छता-सैनिकानां, स्वच्छाग्रहिणां च सम्मेलनावसरो लप्स्यते यैः बापू-चरणस्य 'स्वच्छ-भारत'-स्य स्वप्नम् अग्रेसारयितुं महत्वपूर्ण-योगदानं विहितम्। एते स्वच्छता-सैनिकाः एव अस्मदीयाः 'स्वच्छाग्रहिणः' सन्ति। एप्रिल-मासस्य दशम-दिनाङ्कात् प्राक्, त्रितः नवम-दिनाङ्कं यावत्, 'सत्याग्रहतः स्वच्छाग्रहस्य' आन्दोलनस्य अन्तर्गतम् एते स्वच्छाग्रहिणः बिहारस्य प्रति-ग्रामं गत्वा शौचालयानां निर्माणार्थम् उपयोगार्थञ्च जनान् प्रेरयिष्यन्ति। दृढं विश्वसिमि यत् अमुना प्रयासेन बिहार-राज्येन साकमेव अशेष-देशः पूर्ण-स्वच्छतायाः लक्ष्यम् अतिशीघ्रं प्राप्तुं तस्यां दिशि अग्रेसरिष्यति। स्वच्छता-सम्बद्धम् अपरमेकं रोचकं वृत्तम्। झारखण्ड-राज्यं राज-मिस्त्री-इति गृहकारकतः अग्रे भूत्वा 'रानी-मिस्त्री-इति गृहकारिका-सम्मलेन'-स्य माध्यमेन लक्षं महिलाः शौचालय-निर्माणार्थं प्रशिक्षितवत् । एताः महिलाः प्रदर्शितवत्यः यत् नारी-शक्तिः स्वच्छ-भारताभियानस्य स्वच्छ-शक्तिः वर्तते तथा च एताः यदा, किञ्चित् निश्चय-जातं कुर्वन्ति, ततः परं लक्ष्यं कियदपि भवतु नाम कठिनतरं, तत् पूर्णं कृत्वैव विश्राम्यन्ति। एतद्देशस्य नारी-शक्तये मम भूयान्सि नमान्सि।

वर्षेह्यस्मिन् महात्म-गान्धिनः सार्ध-शती-[150वीं] जयन्ती-वर्षस्य महोत्सवस्य शुभारम्भः भविता। अयं हि ऐतिहासिकावसरः वर्तते। केन प्रकारेण देशेन उत्सवोह्ययम् आयोजनीयः ? स्वच्छ-भारतेति नूनम् अस्मदीयः संकल्पः, एतदतिरिच्य, सपाद-शत-कोटि-देशवासिनः स्कन्धेन साकं स्कन्धं संयोज्य केन प्रकारेण महात्म-गान्धिने उत्तमोत्तमं श्रद्धाञ्जलिम् अर्पयितुं शक्नुवन्ति ? किं नव-नवीनाः कार्यक्रमाः आयोजयितुं शक्यन्ते ? किं अभिनवाः पद्धतयोह्यङ्गीकर्तुं पार्यते ? भवतः सर्वान् साग्रहं कथयामि,MyGov-इत्यस्य माध्यमेन भवन्तः अत्र निज-विचारान् सर्वैः साकं संविभाजयन्तु। 'गान्धि-[150]-सार्ध-शती'-इत्यस्य चिह्न-समाघोष-मन्त्र-घोषवाक्यादि-विषयकान् निज-विचारान् प्रेषयन्तु। अस्माभिः सर्वैः सम्भूय बापू-वर्याय स्मरणीयः श्रद्धाञ्जलिः प्रदेयोह्यस्ति, बापू-स्मृतितः प्रेरणामादाय अस्मदीयः देशोह्ययं सुतरां समुन्नेयो वर्तते।

(दूरभाषाकारणा) नमस्ते ! आदरणीय- प्रधानमन्त्रि-महोदय !... अहं प्रीति-चतुर्वेदी, गुडगाँवतः ब्रवीमि ...प्रधानमन्त्रि-महोदय, यथा भवता 'स्वच्छ-भारताभियानम्' सफलतापूर्णम् अभियानं विहितम्, कालोह्ययं समुपागतः यद् वयं स्वस्थ-भारताभियानमपि तथैव सफलं करवाम... एतदर्थं भवान् देशवासिनो नागरिकान्, प्रशासनानि, संस्थानानि च केन प्रकारेण सन्नद्धीकरोति, एतद्-विषये अस्मान् किञ्चित् निर्दिशन्तु...धन्यवादः धन्यवादः, भवती उचितम् उक्तवती । अहमामिनोमि यत् स्वच्छ-भारतं स्वस्थ-भारतञ्च मिथः पूरके स्तः। स्वास्थ्य-क्षेत्रे अद्यत्वे देशः conventional approach- इति पारम्परिकोपक्रमात् अग्रेसृतोह्यस्ति। देशे स्वास्थ्य-सम्बद्धं सर्वमपि कार्यजातं पूर्वं यत्र केवलं Health Ministry- इति आरोग्य-मन्त्रालयस्य दायित्वं भूयते स्म, तत्रैव साम्प्रतं, भवतु नाम स्वच्छता-मन्त्रालयो वा आयुष्-मन्त्रालयः, रसायनकोर्वरक-मन्त्रालयो वा उपभोक्तृ-मन्त्रालयः, उताहो भवतु महिला-बाल-विकास-मन्त्रालयः वा भवन्तु राज्य-प्रशासनानि - सर्वे विभागाः मन्त्रालयाश्च सम्भूय स्वस्थ-भारतार्थं कार्याणि कुर्वन्ति तथा च, preventive health- इति निवारणीय-स्वास्थ्येन सहैव affordable health- निर्वहणीय-स्वास्थ्यम् अभिलक्ष्य विशेषावधानं प्रदीयते 7 निवारणीय-स्वास्थ्यं सर्वापेक्षया अल्पार्घमपि वर्तते, सरलतमञ्चापि अस्ति 7 तथा च वयं, निवारणीय-स्वास्थ्य-समुपचर्यायै यावन्तो जागरूकाः भवेम, तावान् लाभः, व्यक्तिशः, कुटुम्बाय अपि च, समाजाय चापि भविता। जीवनं स्वस्थं स्याद् - इत्येतदर्थम् अस्ति प्रप्रथमावश्यकता - स्वच्छता। अस्माभिः सर्वैरपि समग्र-देश-रूपेण समाह्वानमिदं स्वीकृतम्, अस्य परिणामस्तु अयमेव सञ्जातः यत् प्रायेण विगते वर्ष-चतुष्के स्वच्छता-व्याप्तिः द्विगुणिता जाता, प्रायेण प्रतिशतं(८०%) अशीतिमिता संवृत्ता । एतदतिरिच्य, सम्पूर्णेह्यपि देशे Health Wellness Centres– इति आरोग्य-सन्धारणकेन्द्राणां निर्माण-दिशि व्यापक-स्तरीयाणि कार्याणि विधीयन्ते। निवारणीय-स्वास्थ्य-समुपचर्या-रूपेण योगाभ्यासः, नूतनतया अशेष-जगति स्वीयाभिज्ञानं प्रतिष्ठापितवान्। योगाचरणं हि fitness- wellness-चेति युक्तता सुस्थितिः चेति द्वयोः कृते प्रतिभूतिं ददाति। अस्माकं सर्वेषां सामूहिक-परिनिष्ठित-प्रयास-कारणादेव अद्यत्वे योगाचरणं हि, जनान्दोलनत्वेन, जगति प्रतिगृहं सम्प्राप्तमस्ति। ऐषमः जून-मासीये एकविंश-दिने आयोज्यमानस्य अन्ताराष्ट्रिय-योग-दिवसस्य कृते प्रायेण दिनानां शतमपि नैवावशिष्यते। विगतेषु त्रिषु अन्ताराष्ट्रिय-योग-दिवसेषु देशे जगति च सर्वत्र जनाः अतितरां सोत्साहं सहभागित्वं निरवहन्। ऐषमः क्रमेह्यपि अस्माभिः सुनिश्चेतव्यं यत् वयं स्वयं योगाभ्यासं करवाम, तथा च मित्राणि, कुटुम्ब-जनान् सर्वान् अस्मादेव कालात् योगाभ्यासार्थं प्रेरयेम। नवीनैः रोचक-प्रकारैः योगाभ्यासं बालेषु, युव-जनेषु, वरिष्ठ-नागरिकेषु चेति प्रत्येकमपि वयोजुषां कृते लोकप्रियं करणीयम्। सामान्यतया दृश्य-माध्यमानि वैद्युदाणविक-माध्यमानि च आवर्षं योग-विषयकान् विविधान् कार्यक्रमान् प्रसारयन्ति एव, परञ्च किम् इतःपरमेव योग-दिवस-पर्यन्तम् -एकस्य अभियानस्य रूपेण योगं प्रति जागरूकतामुत्पादयितुं शक्यते ?

मम प्रियाः देशवासिनः, नाहं योग-शिक्षकः। अस्तु, नूनमहं योग-प्रयोक्तास्मि, परञ्च केचन जनाः स्वीय-रचना-धर्मिता-माध्यमेन मां योग-शिक्षकत्वेन प्रतिष्ठापितवन्तः। तथा च, योगाभ्यास-निरतस्य मम xD animated videos- इति अनुप्राणित-दृश्य-मुद्रिकाः निर्मितवन्तः। भवद्भिः सर्वैः साकमहं ताः दृश्य-मुद्रिकाः संविभाजयिष्यामि येन हि वयं सर्वे युगपदेव आसन-प्राणायामानाम् अभ्यासं कर्तुं पारयेम। साम्प्रतं अशेष-देशे त्रि-सहस्राधिकानि जनौषधि-केन्द्राणि उद्घाटितानि सन्ति यत्र अष्ट-शताधिकानि औषधानि न्यून-मूल्याधारेण उपलम्भयितुं प्रयत्यते। अपराण्यपि नूतनानि केन्द्राणि उद्घाट्यन्ते। 'मन की बात'-प्रसारणस्य श्रोतारः साग्रहं विनिवेद्यन्ते यत् ते अपेक्षावतः जनान् नूनम् एतेषां जनौषधिकेन्द्राणां विषये सूचयन्तु। 'आयुष्मान् भारत-योजना'न्तर्गतं प्रायेण दश-कोटि-कुटुम्बानि उपचारार्थं वर्षे पञ्च-लक्ष-रूप्यकात्मकं व्ययं, भारत-प्रशासनम् आगोप-समवायश्च सम्भूय प्रदास्यतः। समग्र-देशस्य जनाः समीचीनानि स्वास्थ्य-सौविध्यानि भद्रतरोपचारान् च अवाप्नुयुः इति संलक्ष्य विभिन्न-राज्येषु अभिनवानि AIIMS-इति अखिल-भारतीयायुर्विज्ञान-संस्थानानि उद्घाट्यन्ते। प्रति-जनपद-त्रयस्य मध्ये नवीनः चिकित्सा-महाविद्यालयः उद्घाटयिष्यते। पञ्च-विम्शत्युत्तर-दविसहस्र-तम-वर्षं यावत् देशं क्षय-रोग-मुक्तं विधातुं संलक्षितमस्ति। महनीयमिदं कार्यम्। प्रतिजनं एतद्विषयिणीं जागृतिं प्रापयितुं भवतां सर्वेषां साहाय्यम् अपेक्ष्यते। क्षय-रोगात् मुक्ति-प्राप्त्यर्थं अस्माभिः सामूहिकाः प्रयासाः अनुष्ठेयाः सन्ति। आयुर्वेदाधृतान् समुपचारान् सम्वर्धयितुम् आयुर्वेद-विज्ञान-संस्थानानि स्थाप्यन्ते।

मम प्रियाः देशवासिनः, एप्रिल-मासे चतुर्दशे दिने डॉ0बाबा-साहब-आम्बेडकरस्य जयन्ती वर्तते। भारतस्य प्राक्तनः राष्ट्रपतिः डॉ0राजेन्द्र-बाबूः यो हि सम्विधान-सभाध्यक्षः आसीत्, तेन डॉ0आम्बेडकर-विषये कथितमासीत् - 'संविधान-प्रारूपण-समितेः अध्यक्षत्वेन डॉ0आम्बेडकरः अस्वस्थः सन्नपि परिनिष्ठित-भावेन सोत्साहञ्च कार्यमकरोत्, एतादृक् समर्पणं जनेषु दुर्लभमेव। नैक-वर्ष-पूर्वं डॉ0 बाबासाहब-आम्बेडकरः भारतस्य औद्योगिकीकरण-विषयम् उपास्थापयत्। तस्य कृते उद्योगः तादृशं प्रभावि-माध्यमम् आसीत् यत्र निर्धन-तमो जनोह्यपि वृत्तितां लब्धुं पारयति। डॉ0 आम्बेडकरः औद्योगिक-महाशक्ति-रूपेण भारत-विषयकं स्वप्नमवालोकयत्, तल्लक्ष्यमेव अस्माकं कृते प्रेरणाप्रदं वर्तते। साम्प्रतं भारतं वैश्विकार्थव्यवस्थायां प्रभावि-बिन्दुत्वेन समुदेति। बाबा-साहब-महोदयस्य दृढ-विश्वासः आत्मनिर्भरतायामासीत्। साम्प्रतं मुद्रा-योजना, Start Up India, Stand Up India- initiative-इत्येतादृशाः समुपायाः अस्मदीयान् युव-नवाचार-प्रवर्तकान् उद्यमिनश्च संवर्धयन्ति। अशीतेः नवाशीतेः वर्षेभ्यः प्राक् यदा भारते केवलं भूमार्ग-रेलमार्ग-विषयः एव अवधेयः आसीत्, तदाबाबासाहब-आम्बेडकरः समुद्रास्थानकानां नौकाश्रयाणां जलमार्गाणां विषयम् उपास्थापयत् । अयं डॉ0 बाबा-साहबः एवासीत् यो हि जल-शक्तिं राष्ट्र-शक्तिरूपेण अभिज्ञातवान् सम्प्रति देशे जलमार्गाणां पोतास्थानकानां च कृते ऐतिहासिकाः प्रयासाः विधीयन्ते। सम्प्रति वयं शासनस्य प्रत्येकमपि क्षेत्रे सहकारि-संघवाद-संघीय-सहकारितादीनां मन्त्रम् अङ्गी-कृतवन्तः। सर्वाधिकं महत्वाधायि त्विदमेव यत् डॉ0 बाबासाहब-आम्बेडकरः पश्चवर्तिना वर्गेण संयुक्तानां मादृश-सदृशानां कोटि-कोटि-जनानां कृते प्रेरणा-स्रोतस्त्वेन विराजते। तेन अस्मभ्यमिदं प्रदर्शितं यत् समुन्नतये नैतदावश्यकं यत् कश्चन महति समृद्धे च कुले एव जायेत, परञ्च भारते निर्धन-कुटुम्बे लब्ध्वापि जनिं जनाः निज-स्वप्नानि द्रष्टुं तानि च साकारीकर्तुं सफलाश्च भवितुमर्हन्ति।

एवम्, इदमपि जातं यदा अनेके जनाः डॉ0 बाबासाहब-आम्बेडकरमुपहसितवन्तः। तं पश्चवर्तिनं विधातुं प्रायतन्त । सर्व-सम्भव-प्रयासाः कृताः यत् निर्धनस्य पश्चवर्तिनः कुटुम्बस्य सुतः समुन्नतिं नैवाप्नुयात्, जीवने किञ्चिदपि उपलब्धुं नैव शक्नुयात्, पर New India-इत्यभिनव-भारतस्य रूपं सुतरां पृथगस्ति । एकं तादृशं भारतं यद्धि आम्बेडकरस्यास्ति, निर्धनानामस्ति, पश्चवर्तिनामस्ति। डॉ0 आम्बेडकरस्य जयन्त्याः अवसरे एप्रिल-मासे चतुर्दशतः मई-मासस्य पञ्चम-दिनाङ्कं यावत् 'ग्राम-स्वराजाभियानम्' आयोजयिष्यते। अस्यान्तर्गतं समग्रेह्यपि भारते ग्राम-विकासम्, निर्धन-कल्याणं सामाजिक-न्यायञ्चेति अभिलक्ष्य पृथक्-पृथक् कार्यक्रमाः आयोजयिष्यन्ते । भवतः सर्वान् साग्रहम् अनुरुन्धे यत् भवन्तः सोत्साहं सक्रियञ्च अभियानेह्यस्मिन् सहभागित्वं निर्वाहयेयुः।

मम प्रियाः देशवासिनः, आगामिषु केषुचित् दिनेषु अपरेह्यपि अनेके समुत्सवाः भविष्यन्ति। भगवतः महावीरस्य जयन्ती, हनुमज्जयन्ती, ईस्टर्, वैसाखी च। भगवतो महावीरस्य जयन्ती-दिनं हि तस्य तपस्या-त्यागयोः स्मृति-दिनमस्ति। अहिंसायाः सन्देशवाहकस्य भगवतो महावीरस्य जीवनं दर्शनञ्च अस्मान् सर्वान् सततं प्रेरयतः। महावीर-जयन्तीमालक्ष्य सर्वेषामपि देशवासिनां कृते शुभकामनाः वितरामि। ईस्टर-चर्चावसरे प्रभोः ईसा-मसीहस्य प्रेरणादायिनः उपदेशाः स्मर्यन्ते यो हि सर्वदा मानवतायै शान्तेः, सद्भावस्य, न्यायस्य, दयायाः करुणायाश्च सन्देशं प्रादात्। एप्रिल्-मासे पञ्जाबे पश्चिम-भारते च वैसाखी-समुत्सवः आयोजयिष्यते, तर्हि तेष्वेव दिनेषु, बिहारे जुशीतल-सतुवाईन चेति, असम-राज्ये बिहू, अपरतः पश्चिम-बंगाले पोइला-वैसाखस्य च हर्षोल्लासौ सततं विराजिष्येते। इमानि पर्वाणि कथं-कथमपि रीत्या अस्मदीयैः क्षेत्रैः यवखलैः अन्नदातृभिश्च सम्बद्धानि सन्ति। एतेषां पर्वणां माध्यमेन वयं शस्य-पाकोपलब्धि-रूपेण प्राप्यमाणानां बहुमूल्योपहाराणां कृते प्रकृतये धन्यवादान् अर्पयामः। एतेषां पर्वणाम् उत्सवानाञ्च नामानि भवन्तु नाम भिन्नानि परञ्च निज-समरसता-भावैः एते सदैव भारतस्य विविधितासु एकतान्वितायाः संस्कृतेः पोषणं पल्लवनञ्च कुर्वन्ति। पुनरेकवारं भवद्भ्यः सर्वेभ्यः भाविनां सर्वेषां समुत्सवानां सन्दर्भे भूरि भूरि मङ्गल-कामनाः। भूयान्सो धन्यवादाः।

# संस्कृतं जनसंचारमाध्यमानि चावलम्ब्य सङ्गोष्ठी

–अनीता रानी

दिल्ली विश्वविद्यालयस्य लक्ष्मीबाई महाविद्यालये 21/03/2018 तमे दिनाङ्के तत्रत्य संस्कृत साहित्य परिषदा 'संस्कृत एवं जनसञ्चार माध्यमः दशा एवं दिशा' इति विषयम् अवलम्ब्य सङ्गोष्ठी समायोज्यत संयोजिर्त्या डॉ0 अनिता शर्म महाभागया कार्यक्रमस्य परिचयः प्रदत्तः। प्राचार्या डॉ0 प्रत्यूष वत्सला अतिथिभ्यः स्वागतं संस्कृत समाचार वाचकः डॉ0 बलदेवानन्द सागरः, वक्तृरूपेण समुपस्थिता श्यामा प्रसाद मुखर्जी महाविद्यालये संस्कृतविभागे तदर्थ सहायकाचार्या किञ्च दूरदर्शन संस्कृत समाचार वाचिका डॉ0 ज्योति राज महाभागा विषयम् अवलम्ब्य विचारान् प्रकटीकृत्य श्रोतृन् उपकृतवन्तः। सङ्गोष्ठ्याः अध्यक्षेण राजधानी महाविद्यालये पूर्व हिन्दी विभागाध्यक्षेण, भारतीय संस्कृत पत्रकार



व्याहरत्। अस्मिन् अवसरे मुख्यातिथिपदं अलंकुर्वाणा दिल्ली विश्वविद्यालयस्य संस्कृत विभागाचार्याध्यक्षा डॉ0 शारदा शर्मा, विशिष्टातिथिः दिल्लीसंस्कृत अकादम्याः उपाध्यक्षा किञ्च भारती महाविद्यालये सहाचार्या डॉ0 कान्ता रानी भाटिया, मुख्यवक्तृरूपेण समुपस्थिता श्री लाल बहादुर शास्त्री विद्यापीठे व्याकरणाचार्या किञ्च छात्र कल्याण संकाय प्रमुखा डॉ0 कमला भारद्वाज महोदया अथच मुख्यवक्तृरूपेणैव समुपस्थितः आकाशवाण्यां भूतपूर्वः संघस्य देववाणी परिषदशचाध्यक्षेण पद्मश्री-महामहोपाध्याय राष्ट्रपति सम्मानितेन संस्कृतविदुषा डॉ0 रमाकान्त शुक्लेन निगदितं यद्यपि नैकासु दूरदर्शनसरणिषु संस्कृतस्य विविधा। कार्यक्रमा। प्रसार्यन्ते तथापि अस्यां दिशि अधिकतराः प्रयत्ना। अपेक्ष्यन्ते। धन्यवाद ज्ञापनं संस्कृत विभागाध्यक्षेण अथच सहायकाचार्येणडॉ0 दोलामणि आर्येण कृतम्। कार्यक्रमे अनेके विद्वान्सः छात्राश्च उपातिष्ठन्।

# संस्कृतम् चिरनवीना -जयप्रकाशः

–डॉ सुनीलः

पटौदी गुरुग्रामः चैत्र शुक्ल एकादश्यां संवत् 2075 भौमवासरे गुरुग्राम जनपदस्य जटौलीस्थे राजकीय महाविद्यालये संस्कृत संभाषण शिबिरस्य सम्पूर्ति सत्रे मुख्यातिथि रूपेण श्रीमान् जयप्रकाशः उत्तरक्षेत्र संघटनमन्त्री



संस्कृतभारती स्वीयोद्बोधने प्रोक्तवान् यत् संस्कृतभारत्याः उद्देश्यमस्ति पठनं पाठनम्। तेनोक्तं यत् संस्कृतं चिरनवीनमस्ति। तेनोक्तं यदद्य प्रभृति भवतां भवतीनाञ्च दायित्वं संस्कृत प्रसाराय आरब्धम्। भवत्यः भवन्तश्च प्रतिसप्ताहं राष्ट्र कार्याय, संस्कृतकार्याय, समाजकार्याय यच्छन्तु। अवसरेस्मिन् संस्कृतभारत्याः प्रान्त उपाध्यक्षः डॉ श्रेयांश द्विवेदी छात्राणां संस्कृतमयं प्रस्तुतिं अनुभवकथनं श्रुत्वा स्वभाषणेन उक्तवान् यत् साम्प्रतं सर्वे सर्वाश्च संस्कृतमुखाः सञ्जाताः। साम्प्रतम् आवश्यकमस्ति अभ्यासस्य। यदि वयं सर्वे प्रतिदिनं पञ्च पञ्च वाक्यानां प्रयोगं कुर्मश्चेत् संस्कृतज्ञाः भविष्यामः। अवसरेस्मिन् श्री प्रमोदः जनपद संयोजकः संस्कृतभारती साप्ताहिक मेलनार्थं प्रेरितवान्। मञ्चसञ्चालनं डॉ सुनीलः कृतवान्, शिबिर संयोजिका डॉ आशुतोष महोदया कुशलता संयोजनं कृतवती।

महाविद्यालय स्वयं प्राचार्यः श्रीमान् सुरेश धनेरवाल महोदयः संस्कृतभारती प्रयासेन मम छात्राः संस्कृतेन संभाषणशीलाः सञ्जाताः इति महदाश्चर्यम्। तेनोक्तं यत् साप्ताहिकी का अस्माकं महाविद्यालये भवेत्। एतदर्थं सर्वविधं साहाय्यं प्रदास्यामि।

# वेद भारतीय संस्कृतेः प्राणतत्वम् -डॉ त्रिलोकीनाथ चतुर्वेदी

दिल्ली विश्वविद्यालयस्य पी.जी.डी.ए.वी.कॉलेज इत्यस्य संस्कृतविभाग एवं विश्वविद्यालय अनुदानआयोगस्य संयुक्त तत्वावधाने "वेदेषु कला एवं विज्ञानम्" विषये द्वि दिवसीय राष्ट्रिय संगोष्ठ्याः मार्चमासस्य 23 दिनांके भव्यउद्घाटन समारोहेन



सह शुभारम्यो अभवत्। उद्घाटन सत्रे दिल्ली वि.विद्यालयस्य संस्कृतविभागस्य पूर्वविभागाध्यक्ष रमेशचन्द्र उक्तवान यत् वर्तमाने संस्कृतिगत अस्मिताया अभावं रेखांकितं कृत्वा वेदेषु निहित ज्ञान-विज्ञानम् एवं कलायाः विविध सन्दर्भानां समालोचना कर्तव्यम्। उद्धाटन सत्राध्यक्ष पूर्व राज्यपाल एवं पीजीडीएवी महाविद्यालयस्य प्रबन्धकर्ती समिते अध्यक्ष त्रिलोकीनाथचतुर्वेदी उक्तवान यत् भारतीय संस्कृति प्राचीनतम् एवं नवीनतमस्य अद्भुत समन्वयो अस्ति। वेदानां ज्ञानम् इदानीं पुनर्जीवितो भवति अयं गौरवस्य विषयोऽस्ति।

महाविद्यालयस्य प्राचार्य डॉ. रवीन्द्रकुमारगुप्ता उक्तवान यत् कॉलेज स्व स्थापनायाः 60 वर्षस्य सत्र पूर्णः कृतवान। अस्मिन्नवसरे अस्माकं उद्देश्यमस्ति यत् दयानन्दसरस्वती, आर्यसमाज एवं भारतीयसंस्कृति, वेदानां महत्ता, स्त्री शिक्षा आदि विषये समाजं जागरुकं कर्तव्यम्।

विभागाध्यक्ष डॉ.सत्यकामशर्मा वेदे कला एवं विज्ञान विषये प्रकाशः दत्तवान्। प्राध्यापक योगेश शर्मा एवं हिन्दी विभागस्य प्राध्यापक डॉ. हरीश अरोड़ा पृथक-पृथक सत्रस्य संचालनं कृतवान्।

संगोष्ठ्याः द्वितीय दिवसः वेदेषु कला एवं विज्ञान विषये मार्च मासस्य 24 दिनांके विभिन्न विषयानां सत्राणामायोजनमभवत्। सत्रस्य अध्यक्षा विश्वविद्यालयस्य संस्कृत विभागीय सह-आचार्या



डॉ मीराद्विवेदी संगोष्ठ्या समागत विद्वयजनेन नाटकस्य स्वरूपे वार्तालापः कृतवती।

दिल्ली वि.विद्यालयस्य सह-आचार्य डॉ. सत्यपालसिंह उक्तवान यत् भारतीय संस्कृति सप्तण संस्कृतिरस्ति। विश्वे भारतीय संस्कृति एवं आस्ति यो प्रकृतिं जीवन्त स्वीकृत्य ताषु देवत्वं अनुभुयति।

संगोष्ठ्यां वेदानां शिल्प, सलित, संगीत एवं काव्य विषयेअपि दिल्ली वि. विद्यालयस्य डॉ. ऋषिराजपाठक, डॉ विजय गर्ग, डॉ. पकंज कुमार मिश्रः स्व प्रपत्रं प्रस्तौतम्। सत्राध्यक्षा वेव्स दिल्ली प्रदेशस्य शशितिवारी उक्तवती यत् काव्य अपि एकः कला अस्ति। मुख्यातिथि श्री ला.ब.शा.रा.सं.विद्यापीठस्य शिक्षासंकायप्रमुख प्रो. रमेशप्रसादपाठकः वेदानां उपयोगितायां विषये उक्तवान यत् यावत् संस्कृतस्य प्रचार प्रसारः सर्वत्र भविष्यति तावत् देशस्य कल्याणं न भविष्यति। ते उक्तवन्तः यत् प्राथमिक स्तरे संस्कृतं अनिवार्यः भवेत। अन्ते संस्कृतविभागाध्यक्ष डॉ. सत्यकामशर्मा धन्यवादः ज्ञापितवन्तः।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।